# अध्यापकमित्रम्
# केरलपाठावलिः

## संस्कृतम्

**षष्ठी कक्ष्या**
**अक्कादमिक- संस्कृतविद्यालयानां कृते।**

# TEACHER TEXT
# KERALA SANSKRIT READER

## Standard VI

**For Academic and Sanskrit Schools only**

**Government of Kerala**
**Department of Education**
**2015**

## TEACHER TEXT DEVELOPMENT COMMITTEE
### SANSKRIT STANDARD VI - ACADEMIC

### PARTICIPANTS

1. **S.Unnikrishnan Nair**, BRC Trainer (Rtd.) Charippurathu Plavila Veedu, Edackidom, Kollam
2. **N.Aravindakshan,** GUPS Mangaram, Pandalam.P.O, Pathanamthitta
3. **S.Sreekumar**, PPMHS, Karakonam, Thiruvananthapuram
4. **Madhu.K**, SVAUPS, Kodlamogru, Kasargod
5. **Sunilkumar Nair.K**, GHSS, Paivalike, Kasargod
6. **Prasanthan Puthiyandi,** GUPS Katamberi, Kannur
7. **Shiju.M.T,** GBUPS, Perdala, Kasaragod

### EXPERTS

1. **Dr. Shadevan.G,** Prof. Rtd. University College, Thiruvannathapuram
2. **Madhavan Pillai. V**, Associate Professor in Snskrit (Rtd.) Govt. Collage for Women.
3. **Dr. Mohandas.K**, Sr. Lecturer (Rtd.) M.G. University Collage of Teacher Education, Muvattupuzha.

### ADVISORS

1. **Dr. Vasudevan Potti**, Professor (Rtd), Govt. Sanskrit Collage, Thiruvananthapuram
2. **Dr.T.D Suneethi Devi**, Special Officer (Sanskrit) DPI, Thiruvananthapuram

### ACADEMIC CO ORDINATOR

**Dr.Shameeja.P**
Research Officer (Sanskrit) SCERT

***Prepared by***

***State Council of Educational Research and Training (SCERT)***

*Vidya Bhavan, Poojappura, Thiruvananthapuram 605012*

*website www.scertkerala.gov.in*

*email scertkerala@asianetindia.com*

*Department of Education. Government of Kerala 2015*

# भूमिका

छात्रकेन्द्रीकृता प्रवर्तनाधिष्ठिता नूतनाशयैः सन्निविष्टा च पाठ्यपद्धतिः केरलेषु प्रचलति। शिशोः समग्रं विकासं लक्ष्यीकृत्यैव एषामाशयानां प्रवृत्तिः। शिशुमनःशास्त्रम् अनुसृत्यैव परिष्कृता पाठ्यपद्धतिः।

प्रथमं पाठभागः ततः पठनप्रवर्तनानि अनुबन्धश्च इति क्रमः प्रत्येकस्मिन्नेकके स्वीकृतः। पाठ्यांशस्यावतारणाय उचितसन्दर्भानायोजयितुम् अध्यापकाः सोत्सुकाः भवन्तु। तदर्थम् अध्यापकमित्रमिदम् उपकारकं भविष्यति। पाठपुस्तके निर्दिष्टानां सर्वेषामपि पठनप्रवर्तनानां प्रचालनक्रमाः उत्पन्नरूपेण परिकल्पनीयाः अंशाः निरन्तरमूल्यनिर्णयविधयश्च अध्यापकमित्रेऽस्मिन् निर्दिष्टाः। अधिकपठनप्रवर्तनान्यपि यथोचितं कक्ष्यायां दातुम् अध्यापकस्य स्वातन्त्र्यमस्ति।

लिखितानां व्यवहाररूपाणां सूचनानुसारं परिष्करणेन छात्राः भाषाप्रयोगे समर्थाः भवेयुः। निरन्तरमूल्यनिर्णयं सफलं कर्तुम् अध्यापकः यतताम्। तदर्थम् अध्यापकमित्रमिदं सहायकं भवेत्। अपि च संस्कृतपठनं सर्वथा मधुरं सफलं च भवतु इति आशासे।

भवदीयः

**डॉ. एस् . रवीन्द्रन् नायर्**

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद

# विषयानुक्रमणिका


| विषयः | पुटसंख्या |
|---|---|
| सामान्योपगमः। | 5 |
| संस्कृतभाषोपगमः। | 16 |
| मूल्यनिर्णयोपगमः। | 18 |
| सञ्चितपुटानां मूल्यनिर्धारणम्। | 22 |
| अध्यापकमित्रं नाम किम्? किमर्थम्? | 28 |
| वार्षिकासूत्रणम्। | 29 |
| **एककम्-1- देशस्नेहः** | |
| १. मामकदेशः (कविता) | 30 |
| २. देशरक्षा परमो धर्मः (कथा) | 33 |
| **एककम्-२-संस्कृतिः** | |
| ३. स्वास्थ्यमस्तु नः (सम्भाषणम्) | 36 |
| ४. नाम किं वद (प्रहेलिका) | 40 |
| ५. नीतिबोधः (सचित्रकथा) | 44 |
| **एककम्-३- ज्ञानदर्पणः** | |
| ६. विदुरवचनम् (काव्यम्) | 48 |
| ७. शास्त्रोपासकः अच्युतपिषारटिः (जीवनचरितम्) | 53 |
| ८. पठनयात्रा (सम्भाषणम्) | 58 |
| **एककम्-४-साधुभाषितम्** | |
| ९. गीतामृतम् (भगवद्गीता) | 65 |
| १०. सिंहः सिंह एव (पञ्चतन्त्रकथा) | 71 |
| ११.सुभाषितानि | 76 |
| अनुबन्धः | 78 |
| प्रश्नपञ्चिका-उत्तराणि। | 82 |

# सामान्योपगमः

## केरलविद्यालयपाठ्यपद्धतिः २०१५

जनसमुदायस्य जीवितगुणोत्कर्षेण केरलराज्यं सर्वस्य भारतदेशस्य आदर्शभूतं वर्तते। जनशिक्षायाः सार्वत्रिकख्यातिः तथा जनारोग्यरक्षणे उपलभ्यमाना सार्वत्रिकी पुरोगतिश्च प्राधान्येन केरलस्य प्रथमस्तरोपलब्धेः कारणम्।

सामान्यशिक्षाविभागस्य प्रादेशिकसर्वकारसंस्थानां चाधीने विद्यमानानां समग्रविद्याभ्यासपद्धतीनाम्, प्रबुद्धानां जनानां निरन्तरप्रवर्तनानां फलरूपेण च सार्वजनीनविद्यालयेषु नितरां गुणप्रकर्षः समजनि। एवम् आदर्शभूतस्य केरलदेशस्य शिक्षामण्डलस्य एतादृशगुणम् इतोऽप्यधिकतया वर्धयितुम् उत्कृष्टानां समर्थानां छात्राणां सृष्टिरावश्यकी। उत्कृष्टशिक्षायाः छात्राणामधिकाररूपेणाङ्गीकारे पाठ्यपद्धतेरपि गुणः दृढीकरणीयः प्रवर्धनीयश्च।

लोकपरिवृत्त्यनुसारं आधारिकविद्याभ्यासपरिचायन- पाठनरूपेण वर्तमाना प्रक्रिया अपि उचितरूपेण परिवर्तनीया। विद्याभ्यासप्रक्रियायां सर्वदा वर्तमानानां, विविधमण्डलेषु विद्यमानानां चिन्तासरणीनां दर्शनानां चाधारेणैव अधुना पाठ्यपद्धतेः परिष्कारः प्रचाल्यते। साधुतातः अधिकसाधुतायाः इति अन्वेषात्मकः शास्त्रीयोपगमः एव अस्यावलम्बः।

देशीयपाठ्यपद्धतिमार्गरेखायां (२००५) सप्तविंशतितमे पुटे विद्याभ्यासस्य परमप्रधानानि लक्ष्याणि अधिकृत्य सूचितविषयाः प्रसक्ताः।

१ ज्ञानं विद्यालयाद्बहिः विद्यमानेन जीवितेन सह सम्बद्धं भवेत्।

२ पठनं केवलं कण्ठस्थीकरणं न भवतीति दृढीकरणाय।

३ पाठपुस्तककेन्द्रीकृतोपगमात् व्यतिरिक्ततया छात्राणां सर्वतोमुखविकासस्य सहायकरूपेण पाठ्यपद्धतौ शेषयः निर्वचनीयाः।

४ मूल्यनिर्णयोपाधयः सरलाः पठनप्रवर्तनैः उद्ग्रथिताश्च भवेयुः।

५ राज्यस्य प्रजातन्त्रराष्ट्रिये पारस्पर्ये तात्पर्यं वैजात्यातीतं स्वत्वं च पोषणीयम्।

उन्नतचिन्तया मूल्यबोधेन च युक्ता जनता यस्य कस्यापि राष्ट्रस्य अमूल्या सम्पदेव। एतदर्थम् आवश्यकानि उदात्तचिन्तया औचित्यबोधेन च युक्तानि विद्याभ्यासप्रवर्तनानि एव विद्यालयेषु प्रचालनीयानि। राज्यपुरोगतेः गतिविगतीनां निर्णये विद्याभ्यास एव समर्थः इत्यतः क्षेत्रस्यास्य गौरवप्रवर्तनेषु अध्यापकसमाजाः भागभाजः भवेयुः इति चिन्ता अस्मासु अवश्यं भवेत्।

**१.२. पाठ्यपद्धतिपरिष्कारस्य प्रसक्तिः।**

अतीते पञ्चवर्षाभ्यन्तरे विद्याभ्यासमण्डले आगोलव्यापकतया नूतनाशयाः अवतारिताः, केचन नियमाश्च निर्मिताः। एतद्विना वर्तमानपाठ्यपद्धतेः परिमितयः न्यूनताश्च अक्कादमिकाः चर्चाभिः पठनैः च प्रत्यभिज्ञातवन्तश्च। चर्चाः पठनं च क्रोडीकृत्य परिमितीः परिहृत्य पुरोगमनं कालस्यास्यावश्यकं भवतीत्येतदेव परिष्करणममुं प्रसक्तं करोति।

निश्शुल्कं निर्बन्धं च विद्याभ्यासं लब्धुं विद्यार्थिनाम् अधिकारनियमः प्रवृत्तिपथमागतः इत्येतदेवात्र प्रधानतया सूचनीयम्। अनेन नियमेन विवक्षितेषु कार्येषु केरलराज्यं पुरोगामि भवति। उत्कृष्टः विद्याभ्यासः सर्वेभ्यो दातुमेव अस्माभिः श्रद्धा देया। एतादृशरीत्या समग्रविद्यालयविकसनपरिप्रेक्ष्यम् इति लक्ष्यं सार्थकं कर्तुम् अस्माकं पाठ्यपद्धतिः अन्तर्देशीयमानं प्रापणीया भवति। अन्तर्देशीयस्तरं कस्यापि एकस्य राज्यस्य न, प्रत्येकं स्तरं प्राप्तः छात्रः लोके यत्र कुत्रापि भवतु, तेनार्जनीयानां ज्ञानानाम् अनुभवानां च समाहृतरूपमेव भवेत् विद्याभ्यासः। अतः आगोलतले अवतारितानां, समुद्भूतानां नूतनानां प्रकृष्टानां च पठनबोधनानाम् आदर्शरूपाणि केरलराज्यस्य छात्रैरपि प्रापणीयानि। विद्याभ्यासाधिकारनियमस्थाः केचन भागाः अधो दत्ताः। ते पाठ्यपद्धतिपरिष्करणाय आधाररूपेण परिगणनीयाः।

**विद्याभ्यासाधिकारनियमः २००९**

विभागः २९ (अध्यायः - ५)

(पाठ्यपद्धतिः मूल्यनिर्णयप्रचालनक्रमश्च।)

१. प्राथमिकविद्याभ्यासपाठ्यपद्धतिः मूल्यनिर्णयप्रचालनक्रमश्च सर्वकारीयेण विज्ञापनद्वारा निर्दिष्टेनाक्कादमिकाधिकारस्थानेन प्रतिपादनीयः।

२. अक्कादमिकाधिकारस्थानस्य प्रथमोपविभागप्रकारेण पाठ्यपद्धतेः मूल्यनिर्णयप्रचालनक्रमस्य

च प्रतिपादने अधोदत्तकार्याणि परिगणनीयानि।

यथा -

१. संविधाने प्रतिष्ठितैः मूल्यैः सहानुगुणता।

२. छात्रस्य सर्वतोमुखविकासः।

३. छात्रे ज्ञानस्य नैपुणीनां च क्रमेणाभिवर्धनम्।

४. शारीरिकीणां मानसिकीनां च शेषीणां सम्पूर्णविकासः।

५. छात्रसौहृदपरे छात्रकेन्द्रीकृते प्रवर्तने च समीक्षणेन पर्यवेक्षणमुखेन च पठनम्।

६. बोधनमाध्यमरूपेण मातृभाषा प्रयोक्तव्या।

७. भीतिः, मानसिकसम्मर्दसमुत्पादकसाहचर्यम् उत्कण्ठा इत्यादिभ्यः मोचनम्, तथा स्वतन्त्रतया अभिप्रायप्रस्तावे साहाय्यदानं तथा समग्रः निरन्तरश्च मूल्यनिर्णयः।

शिक्षाधिकारनियमस्य प्रयोगावसरे निरन्तरः समग्रः च मूल्यनिर्णयः संविधानबाध्यतारूपेण संजातः। एतद्दृढीकर्तुं साहाय्यकरूपेण पाठ्यपद्धतेः परिष्कारः अत्यावश्यकः। ईदृशायामवस्थायाम् एव पाठ्यपद्धतिपरिष्कारः अस्माभिः पर्यालोचनीयः।

**केरल विद्यालयपाठ्यपद्धतेः (२००९) विशेषताः काः इति पश्यामः**

१. पठितृकेन्द्रीकृता, प्रक्रियाबद्धा, प्रवर्तनोन्मुखा. मूल्याधिष्ठिता च पाठ्यपद्धतिः।

२. बौद्धिकतले, प्रक्रियातले, मनोभावतले, मूल्यानां तले च पठितृभिः प्रापणीयेषु अधिगमेषु श्रद्धां यच्छति।

३. ज्ञाननिर्मितिः इति तत्वमाधारीकृत्य रचिता पाठ्यपद्धतिः।

४. विनिमयप्रक्रियायां वैविध्यपूर्णानां युक्तानां च पठनतन्त्राणां स्वीकाराय उपयोगाय च अध्यापकानां स्वातन्त्र्यं कल्पयति।

५. पाठनाधिगमः, विषयस्वभावः पठितृणां विभिन्नस्तरः इत्यादीन् प्रत्यभिज्ञाय पठनबोधनरीतीनामाविष्कारे आयम्यता।

६. अधिगमपठनम् आशयसम्पादनरीतिः आगमनचिन्तारीतिः चिन्तनं, नैपुणीपोषणं, सहकारितापठनं, सहवर्तित्वपठनं, प्रतिफलनचिन्तापोषणं, व्यक्तिशः संघशश्च अवसरदानम् इत्यादिकं परिगण्यन्ते।

७. निश्शुल्का सार्वत्रिकी च शिक्षा सर्वेषां छात्राणां पठनाधिगमं निश्चिनोति।

प्राक्-प्राथमिकस्तरात् उच्चतरविद्यालयस्तरं यावत् समग्रतया कल्पयित्वा कृता पाठ्यपद्धतिः।

८. एकैकस्यामपि कक्ष्यायां विविधविषयाणाम् उद्दानानि (content) देशीयविषयैः सह एकीकृत्य केरलस्य पाठ्यपुस्तकानि सज्जीकरोति।

९. देशीयस्तरवत् प्रथमद्वितीयकक्ष्ययोः परिस्थितिपठनस्य उद्‌गथनं कृत्वा मातृभाषा, गणितं, आंगलेयभाषा इति पाठपुस्तकानि सज्जीकरोति।

१०. प्रथमतः चतुर्थपर्यन्तं कक्ष्यासु आङ्गलेयमाध्यमपुस्तकानि सज्जीकरोति।

११. श्रेष्ठभाषा, मातृभाषा चेति रीत्या च मलयालभाषापठनस्य प्राधान्यम्।

१२. प्राक्-प्राथमिकस्तरात् उच्चतरशिक्षास्तरं यावत् एकीकृतां पाठ्यपद्धतिं रूपीकृत्य औपचारिकविद्याभ्यासस्य भागं कर्तुं निर्दिशति।

१३. विज्ञानविनिमयसांकेतिकविद्या प्रत्येकं पाठ्यविषयत्वात् उपरि पाठ्यविषयाणां विनिमयं फलप्रदं कर्तुम् उपाधिरूपेण उपयोक्तव्या।

१४. विशिष्टश्रद्धार्हाणां छात्राणां कृते व्यत्यस्तं, विविधं, नूतनं च पठनतन्त्रमाविष्कृत्य प्रचालयेत्। एवमेव विविधानि मूल्यनिर्णयप्रवर्तनान्यपि रूपीकृत्य प्रचालयति।

१५. पठनाधिगमेष्वधिष्ठितस्य समग्रस्य निरन्तरस्य च मूल्यनिर्णयस्य दृढीकरणम्।

१६. आरोग्यकायिकशिक्षा, कलापठनं, प्रवृत्तिपठनम् इत्येतानि निर्बन्धपाठ्यविषयत्वेन परिगणयति।

१७. उच्चतरविद्याभ्यासतले कालानुसृतानि पाठपुस्तकानि सज्जीकरोति।

१८. राष्ट्रियशिक्षानियमस्याधारेण अधिकाराधिष्ठितशिक्षायै प्रामुख्यं ददाति।

१९. अध्यापकानां रक्षाकर्तृरूपेण छात्रस्य सुरक्षायै आश्रयरूपेण च वर्तितुम् अवसरः कल्प्यते।

२०. अध्यापकैः पालनीयायै धार्मिकसंहितायै प्राधान्यं (Code of professional Ethies for school teachers) देयम्।

२१. एकविंशतिशतकस्य पठननैपुणीः आर्जयितुम् उचितया रीत्या कालानुसृतः परिष्कारः। (21st century learning skills)

२२. मानुषिकमूल्ययुक्तानां परम्पराणां सृष्टये पर्याप्तम्।

२३. अवसरतुल्यतां समत्वं च लब्धुमुचिता विद्याभ्यासानुसृता पद्धतिः।

४. पठनं स्वाभाविकरीत्या पठितृणां बौद्धिकं, मानसिकं, प्रवर्तनपरं च समग्रविकासं लक्ष्यीकृत्य मस्तिष्क- हृदय- हस्त समन्विता पाठ्यपद्धतिः (Curriculum for the harmony of Head Heart and Hand) इति दर्शनयुक्ता पाठ्यपद्धतिरेव विवक्षते।

एवं चेत् पाठ्यपद्धत्युपगमः कीदृशः? तस्य सैद्धान्तिकः प्रायोगिकाधारः कः भवेत्।

**१.३. पाठ्यपद्धत्युपगमः।**

ज्ञानेन्द्रियाणामुपयोगेन परिस्थितेः पठने नैसर्गिकशेषिभिः सह शिशुः जायते। विश्वं नूतनरीत्या विलोक्य अवगत्य, निर्णयं कर्तुं सामर्थ्यम् एव विद्यालयात् लब्धेन औपचारिकपठनेन प्रापणीया।

स्वस्य पुरतः विद्यमानेषु प्रश्नसन्दर्भेषु भागं स्वीकृत्य प्रश्नपरिहरणप्रक्रियया एव पठनं प्रचलति। पाठ्यपद्धतिविनिमयोपगमस्य विशेषताः काः भवेयुः?

- प्रवर्तनाधिष्ठितः।
- प्रक्रियाबन्धितः।
- पठनदृढीकृतः।
- पठनाधिगमानां फलप्राप्तये पर्याप्तः।
- परिस्थितौ अधिष्ठिता।
- विकासक्षेत्राणां परिगणनात्मकः।
- पठितुः प्रकृतेरनुगुणः।
- पठनेन सहैव मूल्यनिर्णयोऽपि समन्वितः।

ज्ञाननिर्मितिवादे अधिष्ठिता पठनरीतिः पाठ्यपद्धतेः आधारः। पठितृणामार्जितज्ञानस्य आशयस्य च परिगणनया फलप्रदानां पठनप्रवर्तनानां सज्जीकरणेन स्वाभाविकज्ञाननिर्माणं कर्तुं शक्यते इत्येतदेवास्य दर्शनस्य वैशिष्ट्यम्।

**पठनानुभावाः।**

विभिन्नजीवनसाहचर्येभ्यः आगच्छतां पठितृणाम् आर्जितज्ञानं, शेषी तात्पर्यम् इत्यादीनि

विभिन्नानि एव। एतद्वैविध्यं परिगण्य व्यक्तिवैजात्यं तथा बहुमुखबुद्धिं च परिगण्य पठनानुभवानां सज्जीकरणमित्येतदेव प्रधानम्।

**पठनान्तरिक्षम्।**

पठितुः तात्पर्यं विकासं च परिगण्य विविधपठनप्रवर्तनेषु भागं ग्रहीतुं युक्तरीत्या कक्ष्या सज्जीकरणीया। छात्रकेन्द्रीकृतपठनप्रवर्तनानां साहाय्यकरीत्या प्रवर्तनाधिष्ठितपठनं कथं सज्जीकरणीयमिति अस्माभिः प्रत्यभिज्ञातं किल?

**पठनप्रक्रिया।**

- एकैकोऽपि पठिता स्वपूर्वानुभवानां संबन्धेनैन ज्ञाननिर्मितिं करोति। (knowledge construction)
- ज्ञाननिर्माणं, व्यक्तितले समाजतले च अन्तर्भावितम्।
- विविधाः पठनशेषीः (Learning skills) परिगण्य विविधैः इन्द्रियानुभवैः पठनं फलप्रदं भवति।
- सहकरणात्मके संवादात्मके चान्तरिक्षे पठनम् अन्यन्तं फलप्रदं भवति।
- पठनवेगतां परिगण्य पठनानुभवानां दानेन पठनं फलप्रदं भवति।
- पाठ्यवस्तु तात्पर्योत्पादकम् अर्थपूर्णं च भवेत्। तर्हि पठनं फलप्रदं भवति।
- पठनानुभवाः चाक्रिकरीत्या (Spiralling) अवतारयति चेत् पठनं फलप्रदं भवति।
- पठनप्रवर्तनानुगुणम् आयम्यता (Flexibility) अनुरूपीकरणं (Adaptations) पठनप्रवर्तनानां चयनं (selection) इत्यादीनां प्रचालनेन विभिन्नपठनस्य आवश्यकयुक्तान् अभिरुचियुक्तान् च परिगणयेत्।
- पर्याप्तपठनानुभवानां लाभेनैव पठनाधिगमः दृढीकर्तुं शक्यते।
- पठनं, मूल्यनिर्णयश्च उद्ग्रथितरूपेण चालनीये।
- विषयाधिष्ठितानि उद्दानानि (Contents) पठितुः पठनावश्यकताः च परिगण्य अनुगुणानि विविधानि पठनतन्त्राणि बोधनरीतयश्च प्रयुज्यन्ते चेत् पठनाधिगमः प्राप्तुं शक्यते।
- एकैकस्य समग्रविकासं (All round development) लक्ष्यीकृत्यैव पठनप्रक्रिया निश्चेतव्या।

## १.४. पठनाधिगमाः (Learning outcomes)

विविधैः विषयैः सह क्रियमाणानां प्रवर्तनानां फलरूपेण ज्ञानं शेषी, मनोभावाः / मूल्यानि च छात्रे रूपवत्कुर्वन्ति। एषु केचित् ह्रस्वकालेन, केचित् दीर्घकालेन चार्जिताः भवेयुः। एवं छात्रेषु आवश्यकानि परिवर्तनानि पूर्वमेव निश्चेतुं शक्यानि। पाठ्यपद्धतेः आसूत्रणसमये विद्यालयीयविद्याभ्यासरूपेण विविधस्तरेषु छात्रैः प्रापणीयानि लक्ष्याणि एव पठनाधिगमाः इति गण्यन्ते। केषांचन पठनप्रवर्तनानां श्रेणिभिः एकैकस्मात् एककात् प्रापणीयाः पठनाधिगमाः विकासं प्राप्य एकस्याः कक्ष्यायाः अन्ते प्रापणीयपठनाधिगमत्वेन परिणमन्ति। पठनाधिगमानां वैशिष्ट्यं किमिति चेत् ते निरीक्षणविधेयाः (Observable) मापनीयाः (Measurable) चेत्येतदेव। एकैकस्यापि एककस्य कक्ष्यायाः स्तरस्य चान्ते छात्रैः प्रापणीयं ज्ञानं, शेषीः, मूल्यानि, मनोभावाः प्राप्तानि वा इति निर्णेतुं पठनाधिगमानां विशकलनेन साध्यते। पाठ्यपद्धतेः समुचितेन विनिमयेन सर्वेषां छात्राणां पठनाधिगमः दृढीकर्तुं शक्यते।

पठनाधिगमानां विशेषः एवं संग्रहीतुं शक्यते।

यथा -

- विषयाधिष्ठितेन पठनेन पठितृभिः आर्जनीयं ज्ञानं (Knowledge) शेषीः (Skills) मनोभावाः/ मूल्यानि (Attitudes and values) इत्यादीनां समवाय एव भवेत् पठनाधिगमः।
- पठनाधिगमाः निरीक्षणीयाः (Observable) तथा मापनीयाः (Measurable) च भवेयुः।
- ह्रस्वेन दीर्घेण च कालेन आर्जिता भवेयुः पठनाधिगमाः।

## १.५. पठनविभवाः पठनसंविधानानि

पाठ्यपद्धतेः विनिमयाय उपयुक्ताः विविधाः घटका एव पठनविभवाः। पठनप्रक्रियायाः परिपूर्णतायै पठनविभवानाम् उपयोगाः आवश्यकाः।

- पुस्तकालयः
- परीक्षणशाला (गणितम् शास्त्रम् (Maths, Science)
- पठनोपकरणानि
- प्रदर्शनफलकानि

- संगणकयन्त्रपरीक्षणशाला (Computer lab)
- विविधोपयोगसमर्थानि उपकरणानि।
- एतद्विना छात्राणां शेषीः प्रकटयितुं बहवः मञ्चाः विद्यालये सन्ति किल। एते अपि पठनाधिगमान् अधिगन्तुं प्रयोक्तव्याः।
- बालसभा
- विद्यालयसभा
- समितयः
- चर्चामञ्चः
- पठनयात्रा
- सन्नद्धसंघटना (SPC, NSS, Scout, NCC etc)

छात्राणां संपूर्णविकासाय एतादृशघटकाः अत्यन्तम् अपेक्षिताः।

## १.६. संकलितविद्याभ्यासः (Inclusive education)

*विद्यालये उत्कृष्टप्रकटने समर्थस्य सहपाठिनः वासाय गृहं नास्ति, पथि वर्तमानानां नालिकानां मध्ये पाशेन निबद्धानां पटानामधस्तात् एवास्य कुटुम्बः वसति इति च प्रत्यभिज्ञानं छात्राणां मध्ये चर्चाविषयकमभूत्। केवलं मिथः दुःखकथनेन एतद्विषयः न परिह्रीयेत, इत्यवगम्य ते छात्राः अध्यापकानां साहाय्येन समाहृतं द्रव्यमुपयुज्य तस्मै गृहमेकं निर्माय यच्छन्ति।*
*-(विद्यालयानुभवः)*

कक्ष्यायां सर्वेषां समायोजनेन कस्यापि निवर्तनेन विना च पठनाय अन्तरिक्षं कल्पनीयम्। अस्माकं विद्यालयेषु प्रधानतया विभागद्वयस्यापि परिगणनां साहाय्यं, श्रद्धां च दत्वा नीतिपूर्वकः गुणोत्कर्षविद्याभ्यासः (Equitable quality education) कल्पनीयः।

- विशेषश्रद्धायाः पठनसहायस्य परिरक्षायाः आवश्यकता च केषाम्?
- सामाजिकैः आर्थिकैः च कारणैः बहिष्कृताः बालाः बालिकाश्च।
- व्यत्यस्ते विविधे च सामाजिकसांस्कृतिककुटुम्बपश्चात्तले विवेचनमनुभूयमानाः छात्राः।

अतीव दारिद्र्यमनुभूयमानाः गिरिजनाः बालिकाः, अनुसूचितजातिवर्गयुक्ताः देशान्तरगताः, स्थिरतया वासस्थानरहिताः इत्येवं क्लेशमनुभूयमानाः बहवः अन्तर्भवन्ति। परिमितीः वैजात्यानि च विविच्य ज्ञात्वा तान् अङ्गीकुर्यात् तथा बहुमन्येत इति भवेदस्माकं छात्रान् प्रत्युपगमः।

विद्यालये क्रियमाणैः समूहप्रवर्तनैः एतेषां क्लेशाः परिहर्तुं शक्यते।

- शारीरिकमानसिकसमस्याः अभिमुखीक्रियमाणाः छात्राः।

शारीरिकमानसिकसमस्याः अभिमुखीक्रियमाणानां पठनप्रयासमनुभवानां च छात्राणां प्रत्येकपठनस्य आवश्यकता अस्ति। (Special educational needs) श्रवणे न्यूनता, दृष्टिपरिमितिः, बौद्धिकपरिमितिः चलनपरिमितिः, पठनन्यूनता, *ओट्टिसं* (Autism), मस्तिष्कविघातः (Cerebral palsy) बहुमुखवैकल्यानि वैकारिकासन्तुलितावस्थायुक्ताः च एषु अन्तर्भवन्ति।

पाठ्यपद्धतेः विनिमयाय के के मार्गाः अस्माभिरनुवर्तनीयाः?

- पठनावश्यकानि, अभिरुचिः इत्येतानि परिगण्य पठनप्रवर्तनासूत्रणम्।
- पठनप्रवर्तनेषु छात्राणां सर्वेषामपि भागभागित्वं लब्धुं पाठासूत्रणस्य अनुरूपीकरणम्।

छात्राणां सर्गशेषीः बुद्धेः विविधतलाञ्च उद्दीपयितुं च समुचितरीत्या सूचनासांकेतिकविद्यायाः (ICT) साध्यताः प्रयोक्तव्याः। अस्याः प्रयोगः जिज्ञासाप्रवर्धकः पठनविषयं प्रति तात्पर्यजनकश्च भवेत्। इन्द्रियपरिमितिमनुभूयमानानां एषा साध्यता अतीव प्रयोजनप्रदा भवेत्। अनेन दृश्यश्राव्यरूपेण विषयान् अनुभववेद्यं कर्तुं शक्यन्ते। व्यत्यस्तपठनशैलीः परिगण्य पठनानुभवान् दातुम् अनया शक्यते।

**अध्यापनसंहिता (Teaching manual)**

पठनाधिगमान् लक्ष्यीकृत्य प्रत्येकम् अध्यापकः सर्गात्मकरीत्या प्रवर्तनानि आसूत्रयितुं प्रभवेत्। पाठपुस्तके अध्यापकमित्रे च दत्तानि प्रवर्तनानि स्वस्य कक्ष्यायाः अनुरूपेण आवश्यकान् अंशान् परियोज्य प्रक्रियापुटम् आयोजनीयम्। एकैकं पठनाधिगमम् आप्तुं सहायकानि प्रवर्तनानि आसूत्रणे अन्तर्भावनीयानि।

- प्रवर्तनेन सह मूल्यनिर्धारणमपि अन्तर्भाव्य एव प्रक्रियापुटं लेखनीयम्।
- निरन्तरमूल्यनिर्णयेन लभ्यमानायाः सूचनायाः अङ्कनमेव प्रतिकरणपुटे आवश्यकम्।

एकस्य सप्ताहस्य कृते सज्जीकृता अध्यापनसंहिता विद्यालयीयप्रकृष्टसङ्घे (SRG)

विषयसमित्यां (Subject Council) च अवतारणीया। एकसप्ताहात्मकस्य प्रतिकरणपुटस्य सूचनाः आधारीकृत्य प्रतिफलनटिप्पणिं लिखित्वा SRG / SC मध्ये अध्यापकैः चर्चा करणीया। अस्याः टिप्पण्याः आधारेण अध्यापकस्य भाविनि आसूत्रणानि युक्तानि भवन्ति। अध्यापनसंहितायाः प्रारूपम् अधोदत्तम्।

| **अध्यापनसंहिता** |
|---|
| पाठस्य नाम -<br>दिनाङ्कः -<br>प्रतीक्षितः समयः -<br>पठनाधिगमः -<br>आशयः -<br>शेषीः -<br>भाषावस्तुताः-<br>व्यहाररूपाणि-<br>मूल्यानि, सामग्र्यः -<br>प्रतीक्षितानि उत्पन्नानि- |

| **प्रक्रियापुटम्** | **निर्धारणपुटम्** |
|---|---|
| प्रवर्तनेन मूल्यनिर्णयेन च युक्ता प्रक्रिया | निर्धारणसूचनाः अत्र लेखनीयाः |

प्रथमाध्यापकस्य हस्ताक्षरम्

अध्यापकस्य / अध्यापिकायाः हस्ताक्षरम्

| **प्रतिफलनात्मिका चिन्ता (Reflection) मम अधिगमः निर्णयश्च** |
| --- |
| (पठनप्रवर्तनानां मूल्यनिर्धारणप्रक्रिया द्वारा लब्धानां सूचनानाम् आधारेण।<br>•<br>•<br>•<br>अनुस्यूतप्रवर्तनानि परिहारप्रवर्तनानि।<br>•<br>•<br>• |

प्रतिफलनात्मिका चिन्ता - पूर्वं निश्चितान् पठनाधिगमान् अनुसृत्य निर्वहणं कृतानां प्रवर्तनानां पूर्तीकरणानन्तरमेव प्रतिफलनात्मिकचिन्ता टिप्पणी सज्जीकरणीया।

- पूरिताः टिप्पण्यः प्रतिवारं SRG योगे अवतारणीयाः।
- अनुस्यूतासूत्रणाय दिशाबोधदानम्।
- सत्रस्य निरन्तरमूल्यनिर्णयश्रेणीक्रोडीकरणम्।

# संस्कृतभाषोपगमः।

भारते विविधाः भाषाः सन्ति। तासु भाषासु श्रेष्ठा मातृतुल्य च भवति संस्कृतभाषा। अस्याः भाषायाः पठनेन भारतस्य संस्कृतिं पैतृकं च यथावत् ज्ञातुं शक्यते। २०१४ (चतुर्दशाधिकद्विसहस्रम्) वर्षादारभ्य प्रथमकक्ष्यातः संस्कृतपठनाय केरलीयानां छात्राणां अवकाशः लब्धः इति कार्यं सन्तोषदायकं भवति। अस्माकं मातृभाषायां प्रादेशिकभाषायां च बहूनि संस्कृतपदानि सन्ति इत्यतः केरलीयछात्राणां कृते संस्कृतपठनं सुकरमेव।

आधुनिकेऽस्मिन् भारते बहवः संस्कृतग्रामाः सन्ति। संस्कृतग्रामाणां संख्या वर्धते प्रतिवर्षम्। आधुनिकविषयान् अधिकृत्यापि बहवः ग्रन्थाः संस्कृते प्रतिदिनं जायन्ते। आधुनिकसाङ्केतिकविद्यायामपि संस्कृतभाषायाः स्वाधीनं सुष्ठु वर्तते। अतः संस्कृतपठनस्यावश्यकता अधिकतया वर्तते।

प्राथमिकस्तरे संस्कृतपाठपुस्तकानां रचनासमये पूर्वोक्तानि कार्याणि गणनीयानि भवन्ति। अस्माकं जीविते प्रतिदिनं श्रूयमाणानि संस्कृतपदानि ज्ञातुम् अवगन्तुं वक्तुं च छात्राः शक्ताः भवेयुः। संस्कृते आशयान् व्यक्ततया लेखितुम् अवतारयितुं च छात्राः शक्ताः भवेयुः।

संस्कृते वर्तमानाः वर्धमानाः च बालसाहित्यग्रन्थान् स्वयं पठितुं ज्ञातुम् अस्वदितुं च छात्राः समर्थाः भवेयुः।

अस्मिन् हस्तपुस्तके प्रतिस्तरं छात्रैः आर्जयितुं योग्यानि कार्याणि / उद्देश्यानि पूर्वमेव निश्चितानि सूचितानि च भवन्ति। तानि उद्देश्यानि सफलीकर्तुं योग्यानि प्रवर्तनानि अध्यापकेन कक्ष्यासु उपस्थापनीयानि। पर्याप्तं सन्नाहीकरणम् अध्यापकेन कृतं भवेत्। स्वयमेव पठितुं छात्राः शक्ताः भवेयुः। तदर्थं योग्याः अवसराः देयाः। तान् अवसरान् यथावत् प्रयोक्तुं छात्राः प्रेरितव्याः। एवं चेत् ते सर्गात्मकरचनाः कुर्वन्ति। सर्गात्मिकतया प्रेरिताः ते ज्ञाननिर्माणे व्यापृताः भविष्यन्ति।

लक्ष्येषु प्राधान्यमर्हति संस्कृतं प्रति छात्रेषु प्रीत्युत्पादनम्। तत्कार्ये अध्यापकः श्रद्धावान् भवेत्। इदानीं विद्यार्थिकेन्द्रीकृतकक्ष्यायाः प्राधान्यमेव वर्तते। छात्रेषु सक्रियत्वं स्थापनीयम्।

छात्राः सत्क्रियाः भवन्तु। तदर्थं योग्यानि पठनतन्त्राणि कक्ष्यासु प्रयोक्तव्यानि। छात्राणां जीवितेन सह बद्धानि नूतनानि तन्त्राणि प्रयोक्तव्यानि। छात्रान् संस्कृते भाषणाय प्रेरयतु। तदानीं जायमानाः प्रयासाः अध्यापकेन दूरीकरणीयाः। तदर्थमध्यापकेन

१. छात्राणां नैपुणीं ज्ञातुं यत्नः क्रियताम्। यद्यत्र न्यूनताः सन्ति चेत् ताः दूरीकर्तुं यत्नः कार्यः।

२. नैपुणीनां पोषणाय नूतनाः सन्दर्भाः समायोजनीयाः।

३. छात्रेभ्यः नूतनाः अनुभवाः देयाः।

संस्कृतपठनं मातृभाषया प्रदेशिकभाषया च पठनाय सहायकं भवति। बाल्ये अनेकाः भाषाः पठितुं छात्रेषु नैसर्गिकी शक्तिः अधिकतया प्रतिभाति इति विद्याभ्यासविचक्षणाः वदन्ति। अतः संस्कृतपठनेन अधिकं ज्ञानमार्जयितुं शक्यते। भाषासाहित्ये इव संस्कृतसाहित्येऽपि छात्राणां तात्पर्यं प्रोत्साहनीयम्। छात्राणां रुचिं तात्पर्यं च ज्ञात्वा अध्यापकेन नूतनः सन्दर्भः कक्ष्यासु आयोजनीयः भवेत्।

भिन्नरुचयः भवन्ति जानाः छात्राः च। तेषां ज्ञानार्जनेऽपि व्यतियानमस्ति। छात्राणां स्वांशीकरणपाटवम् अध्यापकेन ज्ञातं भवेत्। स्थिरे दृढे च ज्ञाने नूतनं ज्ञानम् अधिगन्तव्यम्। अनार्जिते उद्दिष्टे ज्ञाने नूतनं ज्ञानम् उत्पादयितुं न शक्यते। इमं तत्त्वं ज्ञात्वा अध्यापकेन उचितः सन्नाहः कार्यः।

पठनं नाम स्वाभाविकी अनवरता काचन प्रक्रिया भवति। ज्ञाननिर्माणे व्यापृते छात्रे अहं पठामि इति प्रतीतिः कदापि न जायेत। पठनम् आनन्ददायकं भवतु। अतः नैसर्गिकप्रक्रिया इव भाषास्वाधीनशक्तिः संभवतु। भाषाशेषीः आर्जयति, न तु पठति इति प्रतीतिः उत्पादनीया।

भाषां न पठति, किन्तु आर्जयति। स्वयंपठनाय छात्रान् प्रेरयतु। अनुकूले सन्दर्भे छात्राः स्वयमेव पठन्ति। अनेकैः पठनप्रवर्तनैः छात्राः स्वाध्यायाय उत्सुकाः भवेयुः। उत्साही छात्रः वाचयति, लिखति, आस्वादयति, पुस्तकानि पठति च। क्रीडासु तात्पर्यमिव पठनेऽपि तात्पर्यं छात्रेषु उत्पादनीयम्। 'यस्तु क्रियावान् पुरुषः स विद्वान्' इत्यस्ति प्रमाणम्। अनुभवानामाधारे आर्जितस्य ज्ञानस्य मूल्यनिर्णयमपि सः करिष्यति। एवं स्वयं रचनायै सामर्थ्यसम्पादनाय प्रोत्साहनम् अध्यापकेन देयम्।

# मूल्यनिर्णयोपगमः

पठनं नाम छात्रेषु स्वाभाविकतया नैरन्तर्येण च प्रचलन्ती एका मानसिकप्रक्रिया भवति। पठनानुभवाः उद्देश्याधिष्ठिताः तथा पठनाधिगमानाधारीकृत्य च यदि भवेयुः तर्हि पठनमपि कार्यक्षमं भवेत्। छात्रैः स्वायत्तीकरणीयाः शेषीः अवबोधांश्चाधिकृत्य अध्यापकः उद्बुद्धः भवेत्। एकैकस्य पाठभागस्य अधिगमाः (Learning outcomes) विभाव्यैव पठनप्रवर्त्तनानि आसूत्रणीयानि। आसूत्रितानि प्रवर्तनानि जीवितसन्दर्भैः सह योजयित्वा अवतारयितव्यानि।

एवं स्वायत्तीकृताः शेषयः धारणाश्च पठनाधिगमान् प्रबलयितुं कियन्मात्रमुपकुर्वन्ति? पठनाधिगमान् पूर्णतया स्वायत्तीकर्तुं के के छात्राः अवशिष्यन्ते? तेभ्यः देयाः पठनानुभवाः के? ते अनुभावाः कथं देयाः? इत्यादयः चिन्ताः एव अध्यापकं मूल्यनिर्णयप्रक्रियां नयति।

## मूल्यनिर्णयस्य वैविध्यम्।

एकस्य पाठभागस्य/एककस्य विनिमयानन्तरं किमधिगतमिति निर्णेतव्यम्। अस्याः प्रक्रियायाः एव पठनसम्बन्धिमूल्यनिर्णयः (Assessmet of learning) इति नाम। पाठभागस्य पठनानन्तरं पठितुः प्रकर्षः पठनस्य स्तरः इत्यादयः अत्र निर्णीयन्ते। एषा प्रक्रिया मूल्यनिर्णयस्य एकं तलमेव भवति। साधारणतया मूल्य- निर्णयः इत्यनेन एष एवार्थः बहुभिः कल्प्यते। परं स्थूणानिखननन्यायेन पठनस्य दृढीकरणार्थं क्रियमाणस्य मुल्यनिर्णयस्यैव अधिकं प्रामुख्यं कल्पनीयम्। एष एव राज्यान्तरस्तरीयः मूल्यनिर्णयालोकः। पठनसमय एव पठनस्य कार्यक्षमतार्थम् अध्यापकेन, इतरेण, सहपाठिना एव वा क्रियमाणः व्यवहाराः भवेयुः। पठनेन सह एतादृशः मूल्यनिर्धारणः प्रतिक्रियादीनां च मूल्यनिर्णयस्य अपरं तलं भवति। अस्यैव पठनार्थं मूल्यनिर्णयः (Assessment for learning) इति नाम। एषः पठनपुरोगत्यै निरन्तरं निर्वहणीयः भवति तथा पठनप्रवर्तनेन सह ओतप्रोतः च भवति।

पठनेन स्वायत्तीकृतान् आशयान् धारणांश्च स्वयंविमर्शनात्मकतया निरीक्षणं, परिणतीनाम् अवगमञ्च निरीक्ष्य एका शोधकप्रक्रिया अप्यस्ति। अस्यैव स्वयंमूल्यनिर्णय इति वदामः। एवं स्वयं मूल्यनिर्णयेनापि पठनं साध्यं भवति। अस्यैव मूल्यनिर्णय एव पठनम् (Assessment as learning) इति नाम। पठनम् अधिकं कार्यक्षमतया निर्वहणीयं चेत् पठनार्थं मूल्यनिर्णयः, मूल्यनिर्णयः एव पठनम् इत्येतयोः अधिकं प्रामुख्यं कल्पनीयम्। एवं रीत्या पठनं फलप्रदं कर्तुं

मूल्यनिर्णयप्रक्रियायाः प्रामुख्यदायकः उपगमः एव अस्माभिः स्वीकरणीयः भवति।

## मूल्यनिर्णयोपगमः।

पठनाधिगमान् दृढीकर्तुमुद्यतः पठनोपगमः स्वीकर्तव्यः अस्ति। अतः पठनाधिगमानां दृढीकरणात्मकः मूल्यनिर्णयोपगमः (Outcome focused assessment) एव स्वीकर्तव्यः। पठनाधिगमान् आधारीकृत्य क्रियमाणेषु पठनप्रवर्त्तनेषु पठितुः सजीवसहभागता ध्रुवं भवति। विमर्शनात्मिका चिन्ता पठनस्य प्रतिफलनं प्रकटनञ्च मिथः बन्धितं ज्ञानम् इत्येतानि एव पठनाधिगमानाधारीकृतस्य पठनस्य विशेषताः।

## मूल्यनिर्णयनैरन्तर्यं समग्रता च। (CCE)

विद्यालयस्तरे निरन्तरं समग्रं च मूल्यनिर्णयं निर्दिशति। पठनं नाम छात्रेषु अनुस्यूतं वर्तमाना प्रक्रिया। अत एव मूल्यनिर्धारणप्रक्रिया च अनुस्यूतं भवेत्। छात्राणां वैज्ञानिकः सामाजिकः वैकारिकश्च विकास एव समग्रविकासः इत्यनेन बुध्यते। मूल्यनिर्धारणप्रक्रियायाः समग्रता तथा अनुस्यूतता च दृढयितुं समग्रः तथा निरन्तरमूल्यनिर्णये (CCE) प्रधानतया क्षेत्रद्वयं परिगणनीयम्।

## CCE क्षेत्रम् ।

१. वैज्ञानिकक्षेत्रे विकासात्मकः मूल्यनिर्णयः।

२. सामाजिक-वैकारिकक्षेत्रे विकासात्मकः मूल्यनिर्णयः।

### एतयोः विशदांशाः।

१. वैज्ञानिकक्षेत्रविकासात्मकः मूल्यनिर्णयः। (प्राथमिकस्तरः)

छात्रेण पठनीया सर्वे विषया वैज्ञानिकक्षेत्रे अन्तर्भवन्ति। भाषा-शास्त्र-गणित-समाजशास्त्र-कला-प्रवृत्ति आरोग्य-कायिकपठनानि अस्मिन् अन्तर्भवन्ति एकैकस्मिन् विषये पठनाधिगमान् अवगम्य कियत्परिमितं स्वायत्तीकृतमिति निर्धारणं करणीयम्। अत्र द्विविधः मूल्यनिर्णयः निर्दिष्टः।

१. निरन्तरमूल्यनिर्णयः (CE)

२. सत्रान्तमूल्यनिर्णयः (TE)

## निरन्तरमूल्यनिर्णयः ।

प्राथमिकस्तरे भाषाविषयाणां पठनम् अनेकासां शेषीनामार्जनाय प्रचलति। परम् अस्मिन् पठने आशयाः वस्तुताः विविधानि वैज्ञानिकक्षेत्राणि सृजनात्मकरचनाः इत्यादीनि वैविध्यपराणि उद्यानानि सन्ति। एतानि विहाय भाषाशेषिनिर्णयः दुष्करः भवति। श्रुत्वा पठित्वा च कार्यग्रहणं, कथित्वा लिखित्वा च प्रकटनं, सर्गात्मकरचनानिर्वहणम् इत्यदीनि भाषापठनेन प्रवर्धयन्ति। अतः भाषापठनस्य केवलशेषिः अथवा विज्ञानसम्पादनम् इति रूपेण पृथक्करणम् असाध्यं भवति।

प्रथमद्वितीयकक्ष्ययोः विषयवस्तूनि (themes) आधारीकृत्यैव भाषा, परिस्थितिपठनं, गणितम् इत्यादिषु विषयेषु प्रवर्त्तनानि आयोजितानि। अतः अनयोः कक्ष्ययोः उद्यानक्षेत्ररूपेण उपयुक्तानि विषयवस्तूनि प्रदिशामः। वाचिकानां लिखितानाञ्च शेषीनां विकासे प्राथमिकस्तरीयाः भवन्ति छात्राः इत्यतः उचितः आलेखनक्रमः स्फुटवाचनं श्रवणं, भाषणं, लेखनम् इत्यादिषु प्रवर्धनं लिपिविन्यासविशेष इत्यादीनि भाषानैपुणीनां प्राथमिकस्तरत्वेन परिगणनीयानि।

शास्त्रविषयेषु आशयरूपीकरणस्य एकैकस्मिन् स्तरे अर्पिताः आशयधारणाः स्वायत्तीकृताः नैपुण्यः च परिगणनीयाः।

अत्र निरन्तरमूल्यनिर्णयः त्रिविधः निर्दिष्टः।

- प्रक्रियायाः मूल्यनिर्णयः।
- सञ्चितपुटानां मूल्यनिर्णयः। (Port folio)
- एककस्तरमूल्यनिर्णयः (एकैकस्मिन् एकके साकल्येन पठनाधिगमानां मूल्यनिर्णयः।)

एते विशदीक्रियन्ते।

## प्रक्रियायाः मूल्यनिर्णयः

पठननिर्वहणसमये प्रक्रियायाः मूल्यनिर्णयं प्राधान्यमर्हति। पठनप्रक्रियायाः अङ्गीभूतानि सर्वाणि प्रवर्तनानि निर्धारणीयानि । तद्वत् अवश्यं साहाय्यमपि करणीयम्। प्रत्येकस्मिन् आशयरूपवत्करणस्तरे छात्रस्य आशयधारणाः तेन स्वायत्तीकरणीयाः शेषीः च निर्धारयितव्याः। एककानां प्रकृतिमनुसृत्य स्वयंमूल्यनिर्णयस्य पारस्परिक मूल्यनिर्णयस्य अध्यापकमूल्यनिर्णयस्य

च सूचकानि सम्पाद्य उपयोक्तुं शक्यते। प्रक्रियायाः मूल्यनिर्णयार्थम् अधोदत्तानि सूचकानि उपयोक्तव्यानि।

१. प्रवर्त्तनेषु भागभागित्वम्।

२. आशयधारणा।

३. नैपुणीनाम् आर्जनम्।

४. प्रकटनम् / अवतारणम्।

५. प्रमाणीकरणम् / सज्जीकरणम्।

सामाजिकवैकरिकक्षेत्रेषु नैपुणीनां मूल्यनिर्धारणमपि प्रक्रियायाः मूल्यनिर्णयस्य भागत्वेन सञ्चालयितव्यम्। प्रक्रियायाः वैशिष्ट्यं निर्धार्य अङ्कदानार्थं सामाजिकवैकारिकक्षेत्रेषु आर्जिताः नैपुणीः परिगणनीयाः। तदर्थम् उपयुक्तेषु पञ्चसूचकेषु विविधानां नैपुण्यः विकासः कियन्मात्रम् इति निर्धारणं पर्याप्तं भवेत्।

| **सूचकाः** | **नैपुण्यः** |
|---|---|
| प्रवर्तनेषु भागभागित्वम् | स्वयम् अवगमनम्, नेतृत्वेशेषिः, व्यक्त्यन्तरनैपुणी, उत्तरवादित्वबोधः |
| आशयः/धारणा | पठननैपुण्यः |
| शेषीनामार्जनम् | निर्णयस्वीकारः प्रश्नपरिहारशेषिः, सर्गात्मकशेषिः |
| प्रकटनम् / अवतारणम् | आशयविनिनयशेषिः |
| प्रमाणीकरणम् / सज्जीकरणम् | विमर्शनात्मिका चिन्ता |

प्रक्रियामूल्यनिर्णयस्य सूचकानामाधारेण तानि निर्धार्य अध्यपकस्य निर्धारणपुटे पठनप्रवर्तनानामायोजनसमय एव आवश्यकं प्रामाणीकरणं कर्तव्यम्। छात्राणां टिप्पणिपुस्तिका प्रक्रियामूल्यनिर्णयार्थं पठनरेखारूपेण उपयोक्तव्या। सत्रान्ते अङ्कत्वेन परिवर्त्य तदर्थं निश्चिते प्रारूपे (format) योजनीयम्।

## सञ्चितपुटानां मूल्यनिर्धारणम्।

पठनमधिकृत्य छात्रेभ्यः रक्षितृभ्यः, अध्यापकेभ्यश्च प्रतिक्रियादानम् (feed back) एव सञ्चितपुटस्य धर्मः। प्रक्रियेयं पठनं त्वरितं करोति। पठनप्रवर्त्तनेषु व्यापृते सति मूर्तमापन्नानि सर्वाणि उत्पन्नानि सञ्चितपुटे अन्तर्भाव्य निर्धारणीयानि। विषयबन्धिता पठनरेखा अस्मिन्नन्तर्भवति। (मम कथापुस्तकम्, मम शब्दकोशः च)

सञ्चितपुटानाम् उदाहरणानि अधः प्रदत्तानि।

- टिप्पणिपुस्तिका
- इतराः रचनाः (वैयक्तिकरचनाः, सांस्कृतिकरचनाः)
- इतराः पठनरेखाः (चित्राणि, समाहरणानि)
- पठनरेखानिर्धारणार्थं छात्रैः रूपवत्कृता सूचकाः।
- सर्गात्मकरचना।
- प्रवृत्तिपुटानि। (work sheets)
- एककनिर्धारणरेखाः।
- सञ्चितपुटनिर्धारणार्थम् अधोदत्तानि सूचकानि उपयोक्तुं शक्यन्ते।
- आशयव्यक्तता अनुयोज्यता च।
- धारणानां स्वांशीकरणम्।
- तन्मयतया अवतारणम्।
- समग्रता।
- प्रामाणीकरणस्य अनुस्यूतता।

प्रक्रियानिर्धारणं सञ्चितपुटनिर्धारणम् इत्येतेषु प्रत्येकं सूचकम् अतिप्रकृष्टम् / प्रकृष्टम्/ माध्यम् / प्रकर्षणीयम् इत्येवं मानं कृत्वा यथाक्रमं ४ / ३ / २ / १ इति अङ्का गणनीयाः। पठनप्रक्रियायां पठितुः प्रकटनं मूर्तीकृतानि उत्पन्नानि इत्येतानि निर्धारयितुम् अध्यापनसंहिता (Teaching manual) पठितुः टिप्पणीपुस्तिका इत्यादीनाम् उद्दानानि उपयोक्तुम् अध्यापकः प्रभवति।

## १. पाठासूत्रणरेखायाः परामर्शानां विशदांशाः।

पठनानुभवान् सूक्ष्मतले आसूत्रयितुं निरन्तरमूल्यनिर्णयं शास्त्रीयतां कर्तुं च पाठासूत्रणं करणीयम्। तदर्थं अध्यापनसंहितायाः (Teaching manual) स्वरूपं परिष्करणीयमस्ति। अध्यापनसंहारेषु अधोदत्ताः घटकाः अन्तर्भावयितव्याः।

- पठनाधिगमाः
- आशयः / धारणाः
- शेषिः
- मूल्यानि / मानोभावः
- पठनसामग्र्यः।
- प्रतीक्षितानि उत्पन्नानि
- समयः
- प्रवर्तनमूल्यनिर्णययुक्तः प्रक्रियापुटः, निर्धारणांशप्रतिपादितः निर्धारणपुटश्च।
- निर्धारणपुटस्य अंशान् आधारीकृत्य भावनाटिप्पणी, छायाटिप्पणी।

## २. विषयबन्धितटिप्पणिपुस्तिकासम्बन्धिनः विशदांशाः।

वैज्ञानिकक्षेत्रस्य मूल्यनिर्णयार्थम् उपयोक्तव्यं मुख्यं प्रमाणमस्ति पठितुः टिप्पणिपुस्तिका। प्रथमद्वितीयकक्ष्यासु पठनप्रक्रियामनुसृत्य विविधानां प्रवर्तनानां पूर्तीकरणाय टिप्पणीपुस्तिका सहायिका भवति। टिप्पणीपुस्तिकाद्वारा पठनाधिगमान् प्राप्तुमवसरं छात्राः लभन्ते। प्रथमद्वितीयकक्ष्यायां छात्राः कियन्मात्रं पठनाधिगमान् सम्पादितवन्तः इति निर्धारयितुमपि टिप्पणीपुस्तिका सहायिका भवति।

तृतीयतः पञ्चमीकक्ष्यापर्यन्तं कक्ष्यासु पठनं कार्यक्षमं कर्तुं विषयबन्धिता टिप्पणिपुस्तिका आवश्यकी भवति। तद्वारा पाठपुस्तकस्थानां प्रवर्तनानाम् अतिग्रहणेन छात्राः पठनाधिगमान् सम्पादयन्तीति निर्णेतुम् अध्यापकः प्रभवति। अत एव तृतीयचतुर्थपञ्चमकक्ष्यासु विषयबन्धिताः टिप्पणिपुस्तिकाः निर्धारणार्थं परिगणनीयाः। षष्ठी सप्तमी अष्टमी कक्ष्यायाः कृते विषयबन्धितानि

टिप्पणिपुस्तकानि आवश्यकानि। पठितुः सर्गात्मकता, चिन्ताप्रक्रिया, भाषानैपुणी इत्याद्याः टिप्पणीपुस्तके प्रतिफलनीयाः भवन्ति। पाठभागस्य विनिमयाय आयोजितानि तन्त्राणि तेषां पूर्तीकरणार्थं पठितुः सन्नद्धता, प्रवर्तनपुटानां विविधस्तरेषु सान्निध्यम् इत्याद्याः सर्वाः सूचनाः टिप्पणीपुस्तके भवेयुः। प्रवर्त्तनद्वारा मूर्तीकृतानि उत्पन्नानि अधिकृत्य विशदांशाः अपि अस्मिन् पुस्तके एव प्रमाणीकरणीयाः।

अध्यापिका अधिगमान् यथासमयं निर्धार्य पठनपुरोगत्यै आवश्यकः निर्देशः साहाय्यं च दद्यात्। अध्यायस्यावसाने तत्सम्बन्धिनः अधिगमान् पठिता कियन्मात्रं स्वायत्तीकृतवानिति निर्धारणार्थमपि प्रमाणत्वेन टिप्पणीपुस्तकं परिगणनीयम्। आशयव्यक्तं सन्दर्भानामाशयानां चानुयोज्यं परामर्शसहितं स्वकीयचिन्ताप्रतिफलकं स्वांशीकृतं च भवेत् टिप्पणीपुस्तकम्। कार्याणि तन्मयतया अवतारणीयानि। आशयस्य चिन्तायाश्च समग्रतया आविष्कारः अनुस्यूतः परस्परबन्धितश्च परामर्शः इत्यादीनां प्रतिफलनात्मकं भवेत् टिप्पणीपुस्तकस्य प्रमाणीकरणाम्।

**एककस्यमूल्यनिर्णयः।**

विविधान् पठनाधिगमान् परस्परबन्धेन विन्यस्यमानः घटकः भवति एककम्। अस्यैका समग्रा प्रकृतिरस्ति। एकस्य एककस्य निर्धारणेन एकां समग्रां प्रकृतिमेव निर्धारयति। वाचिकः मूल्यनिर्णयः प्रश्नोत्तरं विवृतपुस्तकमूल्यनिर्णयः प्रश्नसज्जीकरणम् उत्तरसूचिकावगमनं, नूतनी रचना, निर्धारणम् इत्यादीनि लिखितमूल्यनिर्णयेन सह परिगणनीयानि। निश्चिते एकके पठानाधिगमानां विषये छात्राः कुत्र तिष्ठन्ति इत्यवगन्तुं सहायकाः मानमापकाः उपयोक्तव्याः। एककस्य मूल्यनिर्णयार्थं सूचितानाम् आधारेण अङ्कान् दत्वा सत्रान्ते निश्चितरूपरेखायां प्रामाणीकरणीयम्। एकस्मिन् सत्रे एकाधिकम् एककस्य मूल्यं निर्धारणीयम् इत्यतः एककमूल्यनिर्णयस्य माध्यमेव (AVERAGE) सत्रान्ते योजनीयम्। अत्रोपयुक्तस्य उपकरणस्य प्रकृत्यनुसारीणि सूचकानि अध्यापकेन आयोजनीयानि। एवम् आयोजनावसरे पठनाधिगमः कियन्मात्रं स्वायत्तीकृतः इत्यस्य प्रामुख्यं देयम्। त्रयाणाम् एषां मूल्यनिर्णयानाम् अङ्कस्यानुपातिकतय श्रेणीः दत्वा एव छात्राणां निरन्तरमूल्यनिर्णय श्रेण्याः परिगणनाः। कलापठनम्, प्रवृत्तिपठनम्, आरोग्यकायिकविद्याभ्यास इत्येतेषां विषयाणामपि एवं रीत्या श्रेणी देया।

## निरन्तरमूल्यनिर्णयश्रेण्याः रीतिः।

प्रत्येकं विषयस्य प्रक्रिया, सञ्चितपुटम्, एककतलमूल्यनिर्णयः इत्येतेषु एकैकस्य अङ्काः दशांशत्वेनावगत्य तेषां योगनिर्णयः कार्यः। अस्यानुपातिकी श्रेणी अधोदत्तां पट्टिकामुपयुज्य अवगन्तव्या।

| अङ्कः | शतमानम् | श्रेणी |
|---|---|---|
| ३० | | |
| २३-३० | ७५-१०० | A |
| १८-२२ | ६०-७४ | B |
| १४-१७ | ४५-५९ | C |
| १०-१३ | ३३-४४ | D |
| दशतः न्यूनम् | ३३ तः न्यूनम् | E |

उदाहरणार्थं यस्य छात्रस्य संस्कृतभाषायाः प्रक्रिया, सञ्चितपुटः एककमूल्यनिर्णयः इत्येतेषाम् अङ्काः यथाक्रमं ८, ७, ७, इति चिन्तयन्तु, तर्हि योगः ८ + ७ + ७ = २२ भवति। पट्टिकानुसारं संस्कृतस्य निरन्तरमूल्यनिर्णयश्रेणी B भवति।

## सत्रान्तमूल्यनिर्णयः (TE)

प्राथमिकस्तरे भाषाविषयाणां सत्रे परिगणितानाम् एककानां पठनाधिगमान् आधारीकृत्य व्यवहाररूपाणि भाषावस्तुताः भाषाशेषीः इत्येतानि क्षेत्राणि परिगण्यैव सत्रे मूल्यनिर्णयः भवेत्। उद्ग्रानक्षेत्रस्य नैपुण्याश्च प्रामुख्यं दत्वा विविधानि प्रश्नरूपाणि अत्रायोजनीयानि। शास्त्रविषयाणां सत्रे परिगण्यमानानाम् एककानाम् उद्ग्रानक्षेत्राणि आधारीकृत्य पठनाधिगमस्य प्रामुख्यदायकानि आशयनैपुण्यादीनि मापयितुं पर्याप्तान् प्रश्नान् सज्जीकृत्य सत्रान्तमूल्यनिर्णयः करणीयः। प्रत्येकम् एककस्य / आशयक्षेत्रस्य अनुयोज्यं प्रामुख्यं दत्वा विविधेषु तलेषु मानसिकप्रक्रियाणाम् (ज्ञानम्, अपग्रथनम्, निगमनम्, प्रयोगः) अनुरूपं प्रामुख्यं दत्त्वा च एकं परिनिष्ठापत्रं (Blue Print) सज्जीकृत्य विविधान् प्रश्नान् अत्र सन्तीति निर्णीयैव प्रश्नपत्राणि सज्जीकरणीयानि। प्रश्नानाम् अनुयोज्यानि सूचकानि आयोजनीयानि। तदनुसारेण मूल्यनिर्णयः निर्वहणीयः।

कलापठनम्, प्रवृत्तिपठनम्, आरोग्यविद्याभ्यासः इत्येतेषां विषयाणां सत्रान्तमूल्यनिर्णयः, प्रकटनमूल्यनिर्णयरूपेण (Performace assessment) निर्वहणीयः। तेषां सहाय्यकरूपाणि हस्तपुस्तके दत्तानि।

## मूल्यनिर्णयार्थं विविधानि प्रारूपाणि (format)

प्राथमिकस्तरे कक्ष्याशिक्षकरीतिरेव अस्माकं राज्ये प्रचलति स्म। अतः कक्ष्याशिक्षकस्य प्रमाणीकरणम् अतीवक्लिष्टं भवति। (F1) प्रारूपम् एकस्मिन् सत्रे एकवारं प्रमाणीकृत्य निरन्तरमूल्यनिर्णयश्रेणी सत्रान्तमूल्यनिर्णयश्रेणी च अस्मात् प्रारूपात् वार्षिकक्रोडीकरणप्रारूपे (F3) परिवर्त्य प्रमाणीकर्तुं शक्यते। परन्तु विषयकेन्द्रीकृतरूपेण यदि कक्ष्या सञ्चाल्यते तर्हि (F2) प्रारूपे प्रमाणीकृत्य वार्षिकक्रोडीकरणप्रारूपे (F4) परिवर्त्य योजनीयम्। प्राथमिकस्तरे मलयालं विहाय अन्यभाषाध्यापकाः विषयकेन्द्रीकृतप्रारूपम् उपयुज्य प्रमाणीकुर्वन्तु। प्रतिसत्रं समानानि प्रारूपाणि उपयोक्तुं शक्यन्ते।

## श्रेणीकरणप्रणाली ।

प्रथमतः सप्तमीपर्यन्तं कक्ष्यासु निरन्तरमूल्यनिर्णयस्य श्रेणीकरणप्रणाली एव अधुना प्रचाल्यते। सा प्रणाली पुनरपि प्रथमतः अष्टमीपर्यन्तं कक्ष्यासु अनुवर्तनीया। अतः निरन्तरमूल्यनिर्णयस्य त्रयाणामपि विभागानां अङ्कान् अवगत्य तस्य योगस्य आनुपातिकं श्रेणीकरणं पर्याप्तं भवेत्। प्रत्येकं विषयस्य निरन्तरमूल्यनिर्णयः सत्रान्तमूल्यनिर्णयः इत्येतयोः प्रत्येकं श्रेणीकरणाय अधोदत्ता पञ्चबिन्दुमापिका उपयोक्तव्या।

| अङ्काः / शतांशः | श्रेणी |
|---|---|
| ७५-१०० | A |
| ६०-७४ | B |
| ४५-५९ | C |
| ३३-४४ | D |
| ३३तः अधः | E |

## मूल्यनिर्णयः - वार्षिकक्रोडीकरणं (प्राथमिकस्तरः)

सत्रत्रयेऽपि छात्रेण सम्पादिताः प्रकृष्टाः श्रेणीः/अङ्काः एव निरन्तरमूल्यनिर्णयस्य समग्रा श्रेणी। प्रथमे सत्रे यदि एकः न्यूनश्रेणीं लभेत परं पठने पुरोगतिं प्राप्ते निरन्तरमूल्यनिर्णये

प्रकर्षं स्वायत्तीकरोति तस्य कृते प्रयोजकः भवतु इति सङ्कल्पेन एव एवं निर्वहति। किन्तु एवं श्रेण्यः वर्धिताः इति निरीक्षणं शक्तं कर्तव्यम्।

प्रतिविषयं CE समग्रश्रेणी CE पट्टिकायां TE श्रेणी TE पट्टिकायां च प्रमाणीकरणीयम्। सामजिक वैकारिकक्षेत्राणां मूल्यनिर्णयः प्रत्येकं पट्टिकायम् अङ्कनीयः। छात्रेषु प्रकृष्टा नैपुणी वार्षिकक्रोडीकरण- प्रारूपे अङ्कनीया।

## सामाजिक-वैकारिकक्षेत्राणां मूल्यनिर्णयः (प्राथमिकस्तरम्)

वैज्ञानिकक्षेत्रस्येव सुप्रधानं भवति सामाजिकवैकारिकक्षेत्राणां मूल्याङ्कनम्। सङ्घरूपेण जीवितुं (Learning to live together) वैयक्तिकप्रकर्षं सम्पादयितुं (Learning to be) च युक्ता नैपुणी अत्र परिगणनीया। अपि च पठनशैलीः तन्त्राणि चान्तर्भूता पठननैपुणीसमार्जनं च अस्य क्षेत्रस्य भागत्वेन निर्णेतव्यम्। सामाजिकवैकारिक क्षेत्राणां मूल्यनिर्णयसम्बन्धिन्यः नैपुण्यः अधः प्रदत्ताः ताः एव निर्णेतव्याः।

१. आशयविनिमयशेषिः (communication skill)

२. स्वयं बोधः (self management skill)

३. नेतृत्वशेषिः (leadership skill)

४. व्यक्त्यन्तरनैपुणी (interpersonal skill)

५. निर्णयस्वीकारः (decision making skill))

६. उत्तरवादित्वबोधः (sense of responsibility)

७. विमर्शनात्मिका चिन्ता (critical thining skill)

८. सर्गात्मकशेषिः (creative thinking skill)

९. प्रश्नपरिहारशेषिः (Problem solving skill)

१०. पठननैपुण्यः (study skills)

एतासां मूल्यनिर्णयः छात्रस्य सामाजिक-वैकारिकविकसनं प्रबलीकर्तुं सहाय्यकं भवेत्। वैज्ञानिकक्षेत्रे विषयान् पाठयन्तः अध्यापकाः एव एषां मूल्यनिर्णयमपि कुर्युः। एकैकस्य विषयस्य प्रक्रियायाः निर्धारणस्य भागत्वेन अयं मूल्यनिर्णयः अपि करणीयः। अत्र प्रवर्तनेषु भागभागित्वम् इति सूचकम् उपयुज्य मूल्यनिर्णयस्य भागत्वेन स्वयं ज्ञातं नेतृत्वशेषिः व्यक्त्यन्तरनैपुणी,

उत्तरवादित्वबोधः इत्यादीन्यपि निर्णेतव्यानि। आशयधारणा इति सूचकमुपयुज्य मूल्याङ्कनस्य भागत्वेन पठननैपुणी अपि निर्णेया। शेषीनामार्जनम् इति सूचकेन सह निर्णयस्वीकारः प्रश्नपरिहरणशेषिः सर्गात्मकशेषिः इत्याद्याः निर्णेतव्याः। अवतारणं प्रकटनम् इति सूचकमुपयुज्य निर्णयेन सह आशयविनिमयशेषिः निर्णेतव्या। प्रमाणीक रणं / सज्जीकरणम् इति सूचकमुपयुज्य विमर्शनात्मिका चिन्ता निर्णेतव्या।

सामाजिकवैकारिकक्षेत्रे पठितुः उत्कर्षसम्बन्धीनि कार्याणि अवगत्यप्रमाणीकरणार्थं श्रद्धा देया। प्रतिलोमपरामर्शलेखनार्थं नैव निर्दिशति। प्रत्येकं पठितुः गुणपरा नैपुणी प्रोत्साहनीया। तदधिकृत्य प्रमाणीकरणम् अध्यापनसहितायां करणीयम्। अयं मूल्यनिर्णयः प्रत्येकं पट्टिकायां गुणात्मकतया वार्षिकक्रोडीकरणप्रारूपे अङ्कनीयः। तदर्थं प्रारूपे प्रत्येकं पङ्क्तिः योजिता। पठितुः पुरोगतिपत्रेऽपि एतत्सम्बन्धिप्रमाणीकरणाय अवकाशः देयः। ■

## अध्यापकमित्रं नाम किम् ? किमर्थम् ?

अधिकाराधिष्ठितविद्याभ्यासः इति लक्ष्यं सम्पादयितुं छात्राणं सर्वतोमुखविकासाय अयोजिता इयं परिष्कृता पाठ्यपद्धतिः। एतदनुसारं पठनप्रवर्तनस्य आसूत्रणे निर्वहणे च सामर्थ्यसम्पादनाय मूल्यनिर्णयप्रवर्तनानाम् आसूत्रणे निर्वहणे अध्यापकान् शक्तान् कर्तुं साहाय्यं भवति इदम् अध्यापकमित्रम्।

अस्मिन् पुस्तके पठनाधिगमाः पठनप्रवर्तनानि मूल्यनिर्णयोपाधयः अधिकवाचनांशः प्रवर्तनपुटानि इत्यादीनि कार्याणि अन्तर्भवन्ति। अधिकपठनाय साध्यतायाः उपयोगक्रमः पाठासूत्रणानि वार्षिकासूत्रणं च अस्मिन् आयोजितम्। पठनाधिगमानां प्राप्त्यर्थं यानि यानि प्रवर्तनानि आवश्यकानि तानि सर्वाणि सफलीकर्तुं स्वातन्त्र्यम् अध्यापकानाम् अस्ति।

प्रत्येकम् अध्यापकः, पूर्वोक्तरीत्या छात्राणां पठनं सफलम् कर्तुं यतताम्। तदर्थं अध्यापकमित्रं सप्रयोजकं भूयाद्।

## वार्षिकासूत्रणम्

| सत्रं | मासः | पाठः | अनुबन्धप्रवर्तनानि |
|---|---|---|---|
| पादवार्षिकमूल्यनिर्णयः | **जूण्** | 1. मामकदेशः | सस्वरवचनम्, सतालालपनम्, पदच्छेदं, समस्तपदं लिखति, आशयावतारणं, कवितापूरणं, चयनम्। |
| | **जूलय्** | 2. देशरक्षापरमोधर्मः | कथायाः श्राव्यवाचनम्, कथास्तम्भक्रमीकरणं, समस्तपदचयनम्, वाक्ययोजनम्, आशयलेखनं। |
| | **आगस्ट्** | 3. स्वास्थ्यमस्तु नः | सस्वरवाचनम्, आशयकथनं लेखनञ्च, प्रश्नानां उत्तराणि लिखन्ति, अव्ययानि चित्वा लिखन्ति, पादटिप्पणीं लिखति। |
| अर्धवार्षिकमूल्यनिर्णयः | **सेप्तम्बर्** | 4. नाम किं वद | प्रहेलिकानाम् आशयविवेचनम्, प्रहेलिकानाम् उत्तर निर्धारणम्, टिप्पणिलेखनम्, आप्तवाक्यानि वदति लिखति च। |
| | **ओक्टोबर्** | 5. नीतिबोधः | चित्रणां विशकलनं, भावानुसारं कथा कथनं, कथास्तम्भक्रमीकरणं क्रियापदविवेचनम्, सहार्थकपदानां प्रयोगः पदसूर्यनिर्माणम्। |
| | **नवम्बर्** | 6. विदुरवचनम् | सतालालपनम्, अशयानां वर्गीकरणम्, श्लोकानामाशयलेखनम्, श्लोकानां चयनम्। |
| | **डिसम्बर्** | 7. शास्त्रोपासकः | जीवनचरितं पठति आशयं वदति अच्युतपिषारटिः लिखति, प्रश्नान् रचयति, उत्तराणि लिखति, अव्ययपदानि वाक्येषुयोजयति। |
| वार्षिकमूल्यनिर्णयः | **जनुवरि** | 8. पठनयात्रा<br>9. गीतामृतम | संभाषणांशान् वाचयति। आचारोपचारपदानि विवेचयति। वाक्येषु योजयति, सम्भषणांशान् पूरयति। |
| | **फेब्रुवरि** | गीतामृतम् (अनुवर्तनम्)<br>10.सिहंः सिंह एव | अन्वयमाशयञ्च लिखति। कथां भावानुसारं वाचयति, संश्लिष्टपदानि चिनोति। पदच्छेदं लिखति, समस्तपदानि चिनोति। विग्रहवाक्यानि लिखति। |
| | **मार्च्** | भगवद्गीता (अनुवर्तते)<br>आवर्तनम् | श्लोकचयनम्।<br>आवर्तनम्। |

# एककम् -1

# देशस्नेहः।

## प्रथमः पाठः
## मामकदेशः

### आमुखम्

स्नेह एव लोकस्य सुस्थितेः निदानम्। स्नेहेन सर्वम् प्राप्तुं शक्यते। तत्र च मातृस्नेहः, पितृस्नेहः सोदरस्नेहः, मित्रस्नेहः, प्रकृतिस्नेहः, देशस्नेहः, इत्यादयः सन्ति। देशस्नेहसम्बद्धं पाठद्वयम् एककेऽस्मिन् आयोजितम्।

**पाठस्य नाम** - मामकदेशः।

**उद्देश्यः** - काव्यस्यालपनम्, आशयलेखनम्।
देशस्नेहे आभिमुख्यम्।

**कालांशः** - 10

| आशयः/ धारणाः/ व्यवहाररुपाणि | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| देशस्नेहः परमः धर्मः भवति।<br>काव्यस्यालपनम्।<br>काव्यस्याशयलेखनम्। | कवितायाः सतालमालपनम्।<br>कवितायायाः परिवर्त्य लेखनम्।<br>समानाशयपङ्क्तीनां चयनम्। | कवितां सतालमालपति।<br>कवितानाम् आशयं वदति लिखति च।<br>कवितां परिवर्त्य लिखति। |

## प्रवर्तनम् 1

**उद्देश्यम्** - श्लोकस्य आलपनम्।

**श्लोकालपनम्।**

अध्यापिका स्नेह इत्याशयद्योतिकीनां कवितानाम् आलपनाय छात्रेभ्यः अवसरं ददातु। कैरल्यां प्रसिद्धानां कवितानामपि अवतारणाय अवसरं ददातु।

**यथाः** സ്നേഹമാണഖിലസാരമൂഴിയിൽ
സ്നേഹസാരമിഹ സത്യമേകമാം.
സ്നേഹിക്ക ഉണ്ണി! നീ നിന്നെ
ദ്രോഹിക്കുന്ന ജനത്തെയും......

..............................................

ततः अध्यापिकापि एतादृशाः कविताः चित्वा अवतारयतु।

जय जय कोमलकेरलधरणी।। स्नेहगीतमालपन्तु।

..................................... ...........................

..................................... ...........................

एवं देशस्नेहद्योतकम् एकं पाठं पठामः। छात्रान् विविधान् संघान् कृत्वा कवितापाठस्य आलपनाय निर्दिशतु। ततः अध्यापिका पाठभागं सस्वरमालपतु। तदनन्तरं संघाः पाठं पठित्वा नूतनपदानि चित्वा टिप्पणीपुस्तके विलिख्य शब्दकोशस्य साहाय्येन अर्थं च विलिख्य अवतारयन्तु। अवतारणसमये अध्यापिका तत् फलके लिखतु। संशोधनाय छात्रेभ्यः अवकाशं ददातु।

## प्रवर्तनम् 2

**उद्देश्यम्** - कवितालेखनम्।

रेखाङ्कितानां पदानां स्थाने समानाशययुक्तपदानि उपयुज्य नूतनकवितालेखनाय अवकाशः दातव्यः। छात्राः लिखिताः कविताः अवतारयन्तु। अध्यापिकया यथायोग्यं साहाय्यमपि करणीयम्। पुनः कविताः चित्वा संपुटं निर्मातु।

केरलराज्यं मदीयराज्यं सुन्दरराज्यमिदम्।
पुण्यपुरातनपम्पाधारा प्रवहत्यनवरतम्।।

**प्रवर्तनम् 3**

**उद्देश्यम्** - आशयावगमः।

पाठं पठित्वा दत्ताशययुक्तानां पङ्क्तीनां चयनं कुर्वन्तु छात्राः। संघप्रवर्तनमिदम्। एकैकः संघः एकैकम् आशयं स्वीकृत्य लिखतु। पुनः कक्ष्यायाम् अवतारयन्तु छात्राः। अध्यापिका संशोधयतु।

संस्कृतभाषा पुरातनभाषा भवति।

पुण्यपुरातनसंस्कृतिधारा।

स्नेहः त्यागः, शौर्यम् इत्यादीनि भारतसंस्कृतेः आधारत्वेन कल्प्यन्ते।

स्नेहस्त्यागः शौर्यं धर्मो दानं भूतदया।

भारतदेशे जीवनविषये एते ह्याधाराः।

अस्माकं देशे भाषाणां वेषाणां च वैविध्यमस्ति।

भिन्नो वेषो भिन्ना भाषा भिन्नं रूपमपि।

**प्रवर्तनम् 4** -

**उद्देश्यम्** - कवितां पठित्वा आशयलेखनम्।

**प्रक्रिया** -

कवितां पठित्वा अस्याः आशयं पञ्चभिः वाक्यैः लेखनाय संघान् निर्दिशतु। विलिख्य अवतारयन्तु। ततः सूचकान्युपयुज्य परस्परमूल्यनिर्णयार्थं अवसरं ददातु। ततः लिखितानां संपुष्टीकरणं कृत्वा संपुटमपि रचयन्तु छात्राः।

**कवितायाः आशयः**

भारतदेशः सुन्दरदेशः भवति।

अस्य देशस्य संस्कृतिः पुण्यपुरातना।

संस्कृतिधारा भाषा अनवरतं प्रवहति।

स्नेहः, त्यागः, शौर्यं, धर्मः, दानं भूतदया आदयः जीवनविजये आधाराः भवन्ति। भारतदेशे भिन्नवेषधारिणः भिन्नभाषाद्वारा व्यवहारं कुर्वन्तः अपि जनाः निवसन्ति।

## द्वितीयः पाठः

# देशरक्षा परमो धर्मः

**आमुखम्**

उपदेशशतैः लोकान् प्रबोधितवतां वीरपुरुषाणां जन्मना पावितोऽयं देशः।

कथाः चिन्तोद्दीपिकाः उपदेशपराश्च भवन्ति। संस्कृतसाहित्ये एतादृश्यः कथाः सन्त्यनेकाः। देशस्य रक्षा अस्माकं परमो धर्मः इति सन्देशवाहिकां कांचित् कथां पठामः।

**पाठस्य नाम** - देशरक्षा परमोधर्मः।

**कालांशः** - 15

| आशयः/ धारणाः/ व्यवहाररुपाणि | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| कथा<br>कथासम्पुटः<br>देशस्नेहः<br>देशरक्षा परमो धर्मः। | कथावाचनम्।<br>विग्रहवाक्यलेखनम्।<br>परिचितकथानां अवतारणम्।<br>क्रियापदानां लेखनम्। | कथां उच्चैः वाचयति।<br>कथां पठित्वा आशयं वदति लिखति च।<br>कथाः अवतारयति।<br>क्रियापदानि परिवर्त्य लिखति। |

**प्रवर्तनम् 1**

**उद्देश्यम्** - आशयलेखनम्।

छात्रान् विविधसंघान् करोतु। ततः पाठभागस्य वाचनाय संघान् निर्दिशतु। अनन्तरं नूतनपदानि चित्वा शब्दकोशस्य साहाय्येन अर्थलेखनाय निर्दिशतु। ततः अध्यापिकापि पाठभागं वाचयित्वा आशयं विशदीकरोतु।

**प्रवर्तनम् 2**

**उद्देश्यम्** - आशयक्रमीकरणम्।

पाठभागं पुनः पठित्वा वैयक्तिकतया प्रदत्तकथास्तम्भस्य क्रमीकृत्य लेखनाय प्रेरयतु। ततः द्वित्रान् छात्रान् अवतारणाय निर्दिशतु। पुनः अध्यापिका क्रोडीकरोतु। लिखितान् समाहृत्य संशोधयतु।

**कथास्तम्भः।**

1. कदाचित् काचित् ग्रामीणा पुत्रचतुष्टयेन सह ससुखं वसति स्म।
2. एकदा राज्यसीमायां कलहो*f*भवत्।
3. "प्रतिगृहम् एकैकं युवानं देशरक्षार्थं प्रेषयन्तु" इति ग्राममुख्यः अवदत्।
4. ग्राममुख्यस्यादेशं श्रुत्वा सा प्रथमं पुत्रं तदर्थं प्रैषयत्।
5. पुनरपि आवश्यकतां ज्ञात्वा सा शिष्टान् पुत्रानपि प्रेषितवती।
6. इतो*f*पि प्रेषयितुं मम पुत्रो नास्ति।

**प्रवर्तनम् 3**

प्रदत्तोदाहरणानुसारं क्रियापदानां परिवर्त्य लेखनाय छात्रान् प्रोत्साहयतु। लिखितानि संशोधयतु। पुनः इतो*f*प्यधिकतया क्रियापदानि चित्वा क्तवतु प्रत्ययान्तरूपेषु परिवर्त्य लेखनाय छात्रान् प्रेरयतु। ततः लिखितानां पट्टिकां रचयन्तु छात्राः। अनन्तरं लिङ्गानुसारं रुपाणां भेदमपि विशदीकृत्य क्रोडीकरोतु।

| **क्रियापदानि** | **क्तवतु प्रत्ययान्तः पुल्लिङ्गः** | **क्तवतुप्रत्ययान्तः स्त्रीलिङ्गः** |
|---|---|---|
| अगच्छत् | गतवान् | गतवती |
| अपतत् | पतितवान् | पतितवती |
| अधावत् | धावितवान् | धावितवती |
| अलिखत् | लिखितवान् | लिखितवती |
| अपालयत् | पालितवान् | पालितवती |
| अपठत् | पठितवान् | पठितवती |
| अश्रुणोत् | श्रुतवान् | श्रुतवती |
| अपिबत् | पीतवान् | पीतवती |

**प्रवर्तनम् 4**

अनन्तरं कथां स्ववाक्यैः लिखन्तु छात्राः (वैयक्तिकप्रवर्तनमिदम्)। पुनः संघीभूय लिखितानां संपुष्टीकरणाय अवसरं ददातु। लिखितां कथां कक्ष्यायाम् अवतारयन्तु। अवतारणानन्तरं तेषां सम्पुटं रचयन्तु। अध्यापिका यथावसरं मूल्यनिर्णयमपि करोतु।

## नन्दिनीदेवी

पुरा काश्मीरेषु नन्दिनीदेवी नाम काचित् ग्रमीणा आसीत्। तस्याः चत्वारः पुत्राः आसन्। तदन्तरे राज्यसीमायां कलहः संजातः। सीमारक्षणार्थं नन्दिनीदेवी अपि स्वस्याः जेष्ठं पुत्रं प्रैषयत्। तथापि जनबलेन देशरक्षा अपूर्णा अभवत्। ततः सा शिष्टान् पुत्रानपि देशरक्षणार्थं प्रेषयामास। किन्तु सैनिकानाम् अपर्याप्ततया अन्ये ग्रामीणाः अपि युद्धाय प्रस्थिताः। तद्दृष्ट्वा नन्दिनीदेवी सकरुणं रुरोद। यतः युद्धाय प्रेषितुं तस्यै पञ्चमः पुत्रः नासीत्। सा उवाच 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' इति।

विशेषांशः - छात्रैः समाहृताः कथा 'मम कथापुस्तकम्' इति नाम्ना निरन्तरमूल्यनिर्णयार्थम् उपयोक्तव्यम्।

# एककम् -2

# संस्कृतिः।

विश्वेऽस्मिन् भारतीयसंस्कृतिः सविशेषं स्थानमावहति। विविधाः संस्कृतीः स्वायत्तीकर्तुं शक्ता भवति इयम्। अस्मत्संस्कृतेः वाहिनी भवति संस्कृतभाषा। भाषायामस्याम् उपदेशपराः कथाः, रसप्रदाः प्रहेलिकाः, विज्ञानप्रदानि लेखनानि च सन्ति।

अस्मिन्नेकके 'स्वास्थ्यमस्तु नः, नाम किं वद, नीतिबोधः' चेति त्रयः पाठाः अन्तर्भूताः।

## तृतीयः पाठः
## स्वास्थ्यमस्तु नः

### आमुखम्।

स्वस्थे शरीरे एव स्वस्थं मनः। स्वस्थाः जनाः एव समाजस्य यथा वा देशस्यापि सुस्थितेः निदानम्। अतः स्वास्थ्यपरिपालनम् सर्वेषाम्आवश्यम्। स्वास्थ्याय हितं भोज्यं, शुचित्वं, व्यायामः च सहायकानि भवन्ति।

| | | |
|---|---|---|
| पाठस्य नाम | - | स्वास्थ्यमस्तु नः। |
| उद्देश्यम् | - | स्वास्थ्यस्य प्राधान्यमधिकृत्य अवबोधः। |
| कालांशः | - | 10 |

| **आशयः/ धारणा/ व्यवहाररूपाणि।** | **पठनप्रवर्तनानि / पठनतन्त्राणि** | **पठनाधिगमाः।** |
|---|---|---|
| भावानुकरणकेलिः। | पाठस्य भावानुकरण - केलीरित्या कक्ष्यायां अवतारणम्। | पाठम् उच्चैः वाचयति। पाठस्य आशयं वदति लिखति च। |
| विज्ञापनपत्रम्। स्नानं शरीरशुद्धये। | विज्ञापनपत्रलेखनम्। | विज्ञापनपत्रं रचयति। |
| आसनं गात्रसौख्याय। | पट्टिकाकरणम्। | पट्टिकां लिखति |
| स्वस्थाः जनाः। | | पात्राभिनये सामर्थ्यं सम्पादयति |
| राष्ट्रस्य सम्पदः। | पादटिप्पणीलेखनम्। | पादटिप्पणिं लिखति/ |
| अमितम् अहितं च भक्षणं त्याज्यम्। पादटिप्पणी। | | स्वास्थ्यस्य प्राधान्यम् अधिकृत्य वदति लिखति च। |

**प्रवर्तनम् 1 -** नूतनपदचयनम्।

उद्देश्यम् - आशयावगतिः।

पाठं पठित्वा नूतनपदानि चिन्वन्तु छात्राः। ततः शब्दकोशस्य साह्येन अर्थान् लिखन्तु, कक्ष्यायां अवतारयन्तु। अध्यापिका यथोचितं साहाय्यं च करोतु।

## प्रवर्तनम् 2 भावानुकरणकेलिः।

**उद्देश्यम्** : भावानुकरणे सामर्थ्यसम्पादनम्।

छात्राणां संघं रुपवत्कृत्य पाठभागं पठित्वा पात्राभिनयं कर्तुम् अवसरं ददातु। संधाः अवतारयन्तु। एकस्य संघस्य अवतारणसमये अन्ये संघाः तन्निरीक्ष्य मूल्यनिर्णयं कुर्वन्तु।

## मूल्यनिर्णयसूचिकाः।

अवतारणसामर्थ्यम्।

आशयावबोधः।

भावप्रकटनम्।

**प्रवर्तनम्** 3 विज्ञापनपत्रलेखनम्।

**उद्देश्यम्** : विज्ञापनपत्रलेखने प्रावीण्यसम्पादनम्।

भाषाप्रयोगे पटुत्वम्।

पाठभागं पठन्तु छात्राः। तदाशयान् संयोज्य विज्ञापनपत्राणि लिखन्तु संघाः। विविधानि विज्ञापनपत्राणि संघेभ्यः ददातु। ततः लिखितानि अवतारयन्तु। पुनः परिष्कृत्य संपुटरचनायै निर्दिशतु। यथावसरं साहाय्यं करोतु।

**सूचिकाः**

संक्षिप्तता।

सुव्यक्तता।

लालित्यम्।

**विज्ञापनपत्रम्**

अनन्तपुरम्
2/3/16

**जनाः स्वस्थाः भवन्तु।**

**महात्मन्!**

'स्वस्थाः जनाः राष्ट्रस्य सम्पदः' इति विषयमधिकृत्य अनन्तपुरं स्वास्थ्यकेन्द्रस्य साम्मुख्ये 2016 मार्च् मासस्य पञ्चमे दिने सायं चतुर्वादने विचारसत्रमायोजयति।

तदवसरे 'भोजने निष्ठा, मितत्वपालनम्, भोजनात्पूर्वं हस्तप्रक्षालनस्य आवश्यकता, अहितस्य अनावृतस्य च भक्षणस्य त्यागः, अन्नदोषः रोगाय, स्वास्थ्यपालने शुचित्वं, शुद्धं भक्षणं, व्यायामः च प्रधानम् इत्यादिविषये चर्चा भविष्यति।

भवतां सान्निध्यं सहकरणं च निमन्त्रयिष्ये

भवदीयः

कार्यदर्शी
स्वास्थ्यकेन्द्रः
अनन्तपुरम्।

**प्रवर्तनम् 4 उचितानाम् अनुचितानां च पट्टिकाकरणम्।**

**उद्देश्यम् : विवेचनसामर्थ्यसम्पादनम्।**

प्रदत्तवाक्यानि पठित्वा उचितानि अनुचितानि च विविच्य पट्टिकायां लिखन्तु छात्राः। ततः अवतारयन्तु। अध्यापिका उचितं साहाय्यं करोतु।

**पट्टिका**

| उचितम् | अनुचितम् |
| --- | --- |
| दन्तधावनं करोमि | मालिन्यानि नद्यां निक्षिपामि। |
| योगासनं करोमि | प्रतिदिनं स्नानं न करोमि। |
| परिस्थितिं संरक्षामि शुद्धवस्त्राणि धरामि। | अनावृतं भक्षणं खादामि। |

**प्रवर्तनम् 5 पादटिप्पणीलेखनम्।**

**उद्देश्यम् : चित्रं दृष्ट्वा आशयलेखनम्।**

पाठपुस्तके दत्तानां चित्राणां पादटिप्पणिं वैयक्तिकतया लिखन्तु छात्राः। कतिपयाः छात्राः लिखितानि अवतारयन्तु। अध्यापिका संशोधयतु।

**प्रवर्तनम् 6 लघुटिप्पणीलेखनम्।**

**उद्देश्यम् : लघुटिप्पणिं लिखति।**

छात्राः संघशः पाठं पठित्वा अन्नदोषः इति विषयमधिकृत्य लघुटिप्पणिं लिखन्तु। ततः संघाः अवतारयन्तु। अवतारणसमये अध्यापिका स्खालित्यानि निवारयतु। ततः ताः परिष्कृत्य संपुटं रचयन्तु। ततः सूचिकानुसारं मूल्यनिर्णयं करोतु।

**अन्नदोषः**

अमितं अहितं च भक्षणं दोषाय भवति।
अनावृतं भक्षणं रोगकारणं च।
भक्षणे शुचित्वपरिपालनं नो चेत् तदपि दोषकारणम्।
पर्युषितस्य भक्षणस्य उपयोगेनापि दोषः सञ्जायते।
विरुद्धाहारः अपि न समीचीनः।

**अनुबन्धः**

स्वास्थ्यसम्बद्धलघुलेखान् चित्वा अध्यापिकायाः साहाय्येन संस्कृतभाषया अनूद्य कक्ष्यायां प्रदर्शयतु।

## चतुर्थः पाठः
## नाम किं वद।

### आमुखम्

संस्कृतसाहित्ये प्रहेलिकानाम् अतीव प्राधान्यम् अस्ति। ताः आह्लाददायिन्यः भवन्ति। 'व्यङ्यार्थ-विशिष्टो नीरसो वाक्यविशेषः प्रहेलिका' इति।

यथा

केदारपोषणरता : काशीतलाम्बुवाहिनी गङ्गा।
कंसं जघान कृष्णः कम्बलवन्तं न बाधते शीतः।।

के दारपोषणरताःकेदारपोषणरताः।
का शीतलाम्बुवाहिनी? काशीतलाम्बुवाहिनी गङ्गा।
(काशीगमनशीला गङ्गा)
कं संजघान कृष्णः? कंसं जघान कृष्णः।
कं बलवन्तं न बाधते शीतः? कम्बलवन्तं न बाधते शीतः।

पाठस्य नाम :- नाम किं वद।

**उद्देश्यम्** : प्रहेलिकाः ज्ञात्वा वदति लिखिति च।

**कालांशः** -10

| **आशयः /धारणा / व्यवहाररूपाणि** | **पठनप्रवर्तनानि/ पठनतन्त्राणि** | **पठनाधिगमाः** |
|---|---|---|
| प्रहेलिकाः आह्लाददायिन्यः।<br><br>प्रहेलिका लेखनम्। | प्रहेलिकावाचनम्<br>उत्तरलेखनम्।<br>प्रहेलिकानां चयनम्।<br>आप्तवाक्यानाम् अनुवादः<br>प्रहेलिकायोजनम्। | प्रहेलिकाः पठति<br>मातृभाषातः<br>प्रहेलिकाः<br>अनूद्य लिखति।<br>प्रहेलिकानाम्<br>उत्तरं लिखति। |

**प्रवर्तनम् 1 प्रहेलिकानाम् उत्तरलेखनम्।**

**उद्देश्यम् - प्रहेलिकायाः उत्तरलेखने सामर्थ्यसम्पादनम्।।**

कैरल्यां परिचिताः प्रहेलिकाः वदन्तु छात्राः। अध्यापिका ताः संस्कृते अनूद्य श्यामफलके लिखतु। छात्राणां वाचनाय अवसरं ददातु। ततः पाठभागस्थानां प्रहेलिकानां वाचनाय छात्रान् निर्दिशतु। वाचनावसरे अध्यापिका स्खालित्यानि शोधयतु। ततः पुस्तके दत्तस्य चित्रस्य साहाय्येन तासामुत्तरमपि लिखित्वा अवतारयन्तु।

## प्रवर्तनम् 2 प्रहेलिकानां चयनम्।

उद्देश्यम् - प्रहेलिकानां परिचायनम्।

प्रक्रिया - परिचिताः प्रहेलिकाः चित्वा लिखन्तु छात्राः। अनन्तरं संघे स्थित्वा चिताः प्रहेलिकाः पठित्वा अध्यापकस्य साहाय्येन संस्कृतभाषया अनूद्य कक्ष्यायाम् अवतारयन्तु। उत्तराणि लिखन्तु। ततः संपुटं रचयन्तु।

### काश्चन प्रहेलिकाः।

1. ഞെട്ടില്ലാവട്ടയില
2. കാളകിടക്കും കയറോടും
3. പുത്രന്മാരെല്ലാം തൊപ്പിക്കാർ
4. ഒറ്റക്കാലൻ ചന്തയ്ക്കുപോയി
5. ഒരു കുപ്പിയിൽ രണ്ടെണ്ണ
6. കൊക്കിരിക്കെ കുളംവറ്റി
7. ഓടുംകുതിര ചാടുംകുതിര വെള്ളംകണ്ടാൽ നിൽക്കും കുതിര
8. മുറ്റത്തെ ചെപ്പിനടപ്പില്ല.
9. തൊട്ടകുട്ടിയെ കൊല്ലുന്നൊരമ്മ
10. കണ്ടാൽ സുന്ദരി തൊട്ടാൽ വാടും
11. കാട്ടിലുണ്ടൊരാന പൊന്നണിഞ്ഞു നിൽക്കുന്നു
12. അച്ഛൻ വാങ്ങിയ കാളയ്ക്കു കെട്ടാൻ നേരം തലയില്ല.

1. वृन्तविहीनं वर्तुलपत्रम्।
2. वृषभश्शेते रज्जुर्धावति।
3. पुत्राः सर्वे टोपीवन्तः।
4. एकपादो विपणिं गतवान्।
5. एककूप्यां तैलद्वयम्।
6. बकः तिष्ठति वापी शुष्यति।
7. धावति तुरगः कूर्दते तुरगः तोयं दृष्ट्वा स्थगति च तुरगः।
8. निरावरणा अङ्कणमञ्जूषा।
9. माता स्पृष्टान् पुत्रान् सदा हन्ति।
10. उद्याने तिष्ठन्तीं सुन्दरीं पश्य स्पर्शनमात्रे स्वापमुपैति।
11. भूधरशिखरे भाति किल सुवर्णधारी मत्तगजः।
12. जनको वृषभं क्रीत्वागतवान् बन्धनसमये नास्ति शिरः।

**उत्तराणि।**

1. पार्प्पिटकम्।
2. कूश्माण्डम्।
3. नारिकेलम्।
4. छत्रम्।
5. अण्डम्।
6. दीपः।
7. चर्मनिर्मितपादुकः।
8. कूपः।
9. अग्निपेटिका।
10. लज्जालुः।

11. कर्णिकारः।

12. कूर्मः।

**प्रवर्तनम् - 3 चित्रानुसारं प्रहेलिकानां योजनम्।**

**उद्देश्यम् : - आशयानुसारं प्रहेलिकायोजनम्।**

छात्राः वैयक्तिकतया प्रदत्तानां चित्राणां अधः उचिताः प्रहेलिकाः योजयन्तु। ततः अवतारयन्तु। तस्मिन्नवसरे अध्यापिका यथोचितं साहाय्यमपि करोतु।

छात्राः स्वयं प्रहेलिकाः रचयितुं प्रचोदनीयाः।

## अधिकविस्तरः।

### प्रहेलिकालक्षणम्

1. व्यक्तीकृत्य कमप्यर्थम्
स्वरूपार्थस्य गोपनात्।
यत्र बाह्यान्तरावर्थौ
कथ्येते सा प्रहेलिका।।

2. क्रीडागोष्ठीविनोदेषु
तज्ज्ञैराकीर्णमन्त्रणे।
परव्यामोहने चैव
सोपयोगा प्रहेलिका।।

## पञ्चमः पाठः
# नीतिबोधः

**आमुखम्**

विविधाभिः कथाभिः सम्पुष्टं भवति संस्कृतसाहित्यम्। बाणभट्टस्य कादम्बरी सोमदेवस्य कथासरित्सागरः, गुणाढ्यस्य बृहत्कथा इत्यादयः प्रमुखाः संस्कृतकथाग्रन्थाः। तेषु उपवर्णितानि कथापात्राणि प्रायशः नीतिनिपुणाः नियमज्ञाः पण्डिताः आदर्शपुरुषाः च भवन्ति। तादृशम् एकं कथापात्रं भवति चाणक्यः। तस्य नीतिबोधः छात्राणां मनसि रूढमूलः भवेदिति विचार्यैव पाठभागाऽयम् अत्र आयोजितः।

**पाठस्य नाम - नीतिबोधः**

**आशयः - विनयः, धर्मः, परोपकारः इत्यादयःआत्मसंस्कृतेः आधाराः भवन्ति।**

**नैपुणी - भावानुसारं कथायाः अवतारणम्।**

**कालांशः - 10**

| आशयः/धारणा / व्यवहाररूपाणि। | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः। |
|---|---|---|
| नीतिज्ञाः मान्त्रिणः एव राष्ट्रस्य सम्पदः।<br>चित्रकथा।<br>सस्वरवाचनेन पदच्छेदज्ञानं विग्रहवाक्यज्ञानञ्च।<br>चित्रकथां पठित्वा नीतिबोधावगमनम्।<br>कथास्तम्भान् क्रोडीकरोति।<br>अव्ययज्ञानम्। कथालेखनम्।<br>राजधनस्य निरुपयोगः न कार्यः | चित्राणां विशकलनं कृत्वा भावानुसारं कथां वाचयति।<br>कथास्तम्भान् क्रमीकरोति।<br>क्रियापदानां पट्टिकां रचयति। कथां नाटकरूपेण अवतारयति।<br>सहार्थकपदानां प्रयोगः।<br>पदसूर्यं निर्माति। | चित्राणि निरीक्ष्य आशयं वदति लिखति च।<br>चित्रकथां भावानुसारं काक्वनुसारं च अवतारयति।<br>कथास्तम्भान् क्रमीकरोति।<br>चित्रं निरीक्ष्य कथां लिखति। |

**प्रवर्तनम् 1** पाठवाचनम्।

**उद्देश्यम् :** आशयावगमनम्।

**प्रक्रिया -** पाठवाचनम् पदच्छेदकथनं लेखनं च।

नूतनपदचयनम्

शब्दकोशस्य साह्येन अर्थलेखनम् अर्थावतारणम्।

क्रोडीकरणम्।

**प्रवर्तनम् 2** कथास्तम्भक्रमीकरणम्

**उद्देश्यम् :** आशयं क्रमीकृत्य कथां लिखति।

**प्रक्रिया :** पाठवाचनानन्तरं वैयक्तिकतया प्रदत्तान् कथास्तम्भान् क्रमीकुर्वन्तु। कथामवतारयन्तु। अवतारणवेलायाम् अध्यापिका यथोचितं साहाय्यं करोतु।

**क्रमीकृतः कथास्तम्भः**

कश्चित् चीनसञ्चारी चन्द्रगुप्तं द्रष्टुं पाटलीपुत्रम् आगच्छत्। सञ्चारी चाणक्यं द्रष्टुं भटैः सह प्रस्थितवान्। भटाः गङ्गातीरस्थं चाणक्यकुटीरम् अदर्शयन्। चाणक्यस्य नीतिबोधं विज्ञाय सञ्चारी नम्रशिरस्कः अभवत्।

**प्रवर्तनम्** 3 चित्रं निरीक्ष्य कथालेखनम्।

**उद्देश्यम् :** सूचनानुसारं कथालेखनसामर्थ्यम्।

**प्रक्रिया :**

छात्राः संघे स्थित्वा परिचिताः कथाः कथयन्तु। अनन्तरं पाठपुस्तकस्थां चित्रकथां निरीक्ष्य कथालेखनाय निर्दिशतु। प्रथमं छात्राः कैरल्यां कथां वदन्तु। अध्यापिका तां भाषान्तरीकृत्य वदतु। पुनः छात्राः पाठपुस्तकस्थकथांशान् पठित्वा यथायोग्यं समायोज्य कथां लिखन्तु अवतारयन्तु च। अध्यापिका क्रोडीकरोतु। रचिताः कथाः सञ्चित्य सम्पुटमेकं रचयतु। सूचनानुसारं मूल्यनिर्णयं करोतु। छात्राः संस्कृतेनापि कथां वक्तुं प्रेरणीयाः।

## क्रोडीकरणम्

काकी स्वनीडे अण्डद्वयं निक्षिपति स्म। सा अन्नमाहर्तुम् अगच्छत्। तदा एव काचित् कोकिला आगत्य काकनीडे अण्डमेकं निक्षिप्तवती। काकी सर्वाणि अण्डानि पर्यपालयत्। ततः काकी अण्डेभ्यः जातान् शावकान् समवर्धयत्। संजातपक्षः पिकपोतः काकनीडं त्यक्त्वा अन्यत्रागच्छत्।

**प्रवर्तनम्** 4 क्रियापदलेखनम्।

**उद्देश्यम् :** लकारविवेचनम्। लङ् लकाररूपाणां परिचायनम्।

**प्रक्रिया :** उदाहरणानुसारं भूतकालक्रियाः विलिख्य पट्टिकां पूरयन्तु छात्राः।

| **वर्तमानकालः (लट्)** | **भूतकालः (लङ्)** |
|---|---|
| दर्शयति | अदर्शयत् |
| मिलति | अमिलत् |
| भवति | अभवत् |
| पठति | अपठत् |
| गच्छति | अगच्छत् |
| लिखति | अलिखत् |
| हसति | अहसत् |
| संवर्धयति | समवर्धयत् |

**प्रवर्तनम्** 5 पदसूर्यस्य साहाय्येन वाक्यलेखनम्।

**उद्देश्यम् :** वाक्यरचनासामर्थ्यम्। सहार्थकपदानां प्रयोगावगमनम्।

**प्रक्रिया :** छात्राः सङ्घे स्थित्वा अभ्यासे प्रदत्तं पदसूर्यं सम्यक् पठित्वा उदाहरणानुसारं वाक्यानि रचयन्तु। ततः अवतारयन्तु । अध्यापिका स्खालित्यनिवारणं करोतु।

**क्रोडीकरणम्**

1. लता सोदरेण सह पुष्पाणि चिनोति।
2. लता जनकेन साकं विद्यालयं गच्छति।
3. लता राधया सार्धं नृत्तं करोति।
4. लता अम्बया समम् ओदनं पचति।

**अधिकविस्तरः**

'सहयुक्ते अप्रधाने' 'इति सूत्रेण सहार्थकपदानां योगे अप्रधानकर्तुः तृतीया विभक्तिः प्रयोक्तव्या। മുകളിൽ സൂചിപ്പിച്ച എല്ലാവാക്യങ്ങളിലേയും सहार्थक പദങ്ങൾ മാറി മാറിപ്രയോഗിച്ച് കൂടുതൽ വാക്യങ്ങൾ എഴുതാവുന്നതാണ്.

# एककम् -3

# ज्ञानदर्पणः

## आमुखम्

"ज्ञानादेव तु कैवल्यम्" इति लोके सर्वत्र प्रसिद्धमेव। तद्वदेव व्यक्तित्वरूपवत्करणे अपि ज्ञानस्य परमप्राधान्यमस्ति।लौकिकजीवने यानि मूल्यानि अनुकरणीयानि तानि बोधयितुं महाभारतात् उद्धृतं विदुरवचनं, महापण्डितस्य अच्युतप्पिषारटिमहोदयस्य जीवनचरितं, कामपि पठनयात्रामधिकृत्य सम्भाषणांशांश्च एककेƒस्मिन् समायोजिता।

## षष्ठः पाठः
## विदुरवचनम्

## आमुखम्

संस्कृतसाहित्ये परमश्रेष्ठस्थानमावहति महाभारतम्। 'महत्वात् भारवत्वात् च महाभारतमुच्यते', 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्' इत्याद्याः उक्तयः महाभारतस्य महनीयतामावेदयति। महाभारते सदुपदेशैः विदुरः अन्धस्य धृतराष्ट्रस्य सन्देहान् दूरीकरोति तम् आनन्दयति च। तदेव अस्मिन् पाठभागे आयोजितम्। छात्राणां मनसि सद्विचारान् अङ्कुरयितुं पाठभागस्य समायोजनेन लक्ष्यते। काव्यानामाशयं गृहीत्वा सतालालपनम् इतिहासपरिचयसम्पादनम् स्वभावविशेषाणां विवेचनसामर्थ्यमित्यादीनाम् आवश्यकतां बोधयितुम् उपकरोत्ययं पाठभागः।

**पाठस्य नाम** - विदुरवचनम्

**उद्देश्यम्** - छात्राणां मनसि सद्विचाराणाम् अङ्कुरीकरणम्।

**कालांशः** - 12

**आधारग्रन्थसूची - महाभारतम् - विदुरनीतिः।**

| आशयः/धारणा / व्यवहाररूपाणि। | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः। |
|---|---|---|
| व्यक्तित्वविकासः। इतिहासयोः अभिमुख्यम्। श्लोकानामाशयलेखनम्। पदच्छेदसामर्थ्यम्। अन्वयस्य अर्थस्य च ग्रहणम्। सतालम् आलपनम्। स्वाभावविशेषाणां विवेचनं पट्टिकाकरणञ्च। काव्यम्। | श्लोकालपनं करोति। श्लोकानाम् अन्वयम्, अर्थं च जानाति। श्लोकानामाशयं स्ववाक्यैर्लिखति। स्वाभावविशेषान् वर्गीकृत्य पट्टिकां निर्माति। | तालसमन्वितं काव्यमालपति। काव्यं पठित्वा अन्वयस्य अर्थस्य च लेखन परिचायनं सम्पादयति। श्लोकानामाशयं लिखति। स्वभावविशेषान् विविच्य ज्ञात्वा पट्टिकां पूरयति। |

**आख्यानम्-**

महाभारतस्य सविशषताः अधिकृत्य चर्चा प्रचालयतु। छात्राणां अभिमतानि श्याम-फलके विलिख्य, अध्यापिका चर्चायाः क्रोडीकरणं करोतु।

**चर्चासूचिकाः** - ग्रन्थकर्ता, ग्रन्थस्य महत्वं, विशेषताः कथासन्दर्भञ्च

व्यासविरचितमितिहासग्रन्थः ववति महाभारतम्। तत्र अष्टादशपर्वाणि-पर्वसु उपपर्वाणि-अध्यायानि च सन्ति। तत् विश्वसाहित्ये आकारेण महत्वेन च प्रथमस्थानमावहति। अस्मिन् लोके यानि यानि सन्ति तानि सर्वाणि महाभारते प्रतिपादितानि एव। महाभारते यन्नास्ति

तदन्यत्रापि नास्ति इत्याशयः। एवं नित्यनूतनत्वं सर्वव्यापित्वञ्च अस्ति महाभारतस्य। महाभारते प्रधानतया कुरुवंशीयानां राज्ञां चरितं प्रतिपादयति। व्यासपुत्रेषु धृतराष्ट्रस्य पाण्डोः च कनिष्ठसोदरः भवति विदुरः। महापण्डितः विदुरः धृतराष्ट्राय युद्धारम्भे सन्देहान् दूरीकरोति इति प्रसङ्गः।

**प्रवर्तनम् 1** श्लोकान् सतालमालपतु।

**उद्देश्यम्** श्लोकानामाशयावगमनम्।

छात्राः सतालमालपन्तु। अध्यापिका यथोचितं साह्यमपि करोतु।

**प्रवर्तनम् 2** श्लोकानामाशयलेखनम्।

**उद्देश्यम्** श्लोकानामाशयावगमनम्।

छात्राः सङ्घे स्थित्वा श्लोकानामालपनानन्तरं चर्चां कृत्वाआशयलेखनाय निर्दिशतु। सङ्घनेतारः अवतारयन्तु। तेषाम् अवतारणानन्तरं वैयक्तिकरीत्या परिष्कृत्य लेखनाय निर्दिशतु। लेखनानन्तरं कतिपयछात्राः अवतारयन्तु। कस्य रचना श्रेष्ठतमा इति परस्परमूल्यनिर्णयेन निश्चित्य सम्पुष्टीकरणाय निर्दिशतु। अध्यापिका उचितं साह्यमपि करोतु।

**मूल्यनिर्णयसूचिकाः**

वाक्यशुद्धिः।

उचितया रीत्या आशयलेखनम्।

पौर्वापर्यक्रमः।

संक्षिप्तता।

छात्राणां सम्पुष्टीकृतरचनाः सञ्चित्य सम्पुटमेकं निर्मातु। अध्यापिका श्लोकानामाशयं क्रोडीकृत्य कमपि मार्गमवलम्ब्य कक्ष्यायां प्रदर्शयतु। टिप्पणिपुस्तके लेखनाय निर्दिशतु।

**क्रोडीकरणम्** ।

मनसा वाचा कर्मणा चक्षुषा च यः मनुष्यः लोकान् आनन्दयति तं लोकः अनुमोदयति। यः नरः सर्वासु अवस्थासु अपि समभावनया वर्तते स एव पण्डितः। यः मानवः अलभ्यं न अभिलषति विनष्टं प्रति नानुशोचति स एव प्राज्ञः भवति। यो मानवः दुर्जनं मित्रं सम्भाव्य सज्जनानामभिमतान् विगणय्य दुष्कर्मसु व्यापृतः भवति सः मूढः एव। यः

आमन्त्रणं विना प्रविशति, प्रश्नं विना भाषणं करोति, अप्रमत्तान् परित्यज्य प्रमत्तेषु विश्वासमर्पयति सः बुद्धिशून्य एव। अतः सर्वदा समभावनया सकलकार्येषु व्यापृतो भूत्वा सत्कर्मनिरताः भवेयुः इत्याशयः।

**प्रवर्तनम् 3** - पट्टिकाकरणम्

**उद्देश्यम्** - स्वभावविशेषान् विविच्य जानाति।

**प्रक्रिया** -

अध्यापिका प्रदत्तान् स्वभावविशेषानां वर्गीकृत्य लेखनाय निर्दिशतु। छात्राः वैयक्तिकरीत्या लिखन्तु अवतारयन्तु च। अवतारणसमये सूचिकानां साह्येन छात्राः परस्परमूल्यनिर्णयं कुर्वन्तु।

**मूल्यनिर्णयसूचिके** - अनुयोज्यता।
व्यक्तता

छात्राणां मूल्यनिर्णयानन्तरम् अध्यापिका क्रोडीकृत्य पट्टिकां प्रदर्शयतु।

**मूढः**

अनाहूतः प्रविशति।
दुष्टं कर्म करोति।
अमित्रं मित्रं कुरुते।
मित्रं द्वेष्टि।

**पण्डितः**

नष्टेषु नानुशोचति।
आपत्सु न मुह्यति।
निर्भयः सन् कर्म करोति।

# अनुबन्धः

## വിദുരർ

മഹാഭാരതത്തിന്റെ രചയിതാവും അതിലെ കഥാപാത്രവുമായ വ്യാസൻ പിന്നീട് സത്യവതി എന്ന പേരിൽ പ്രസിദ്ധയായ 'മത്സ്യഗന്ധി' എന്ന മുക്കവസ്ത്രീയിൽ പരാശര മഹർഷിയുടെ പുത്രനായി ജനിച്ചു. ശന്തനുമഹാരാജാവിന്റെ പത്നിയായിത്തീർന്ന സത്യവതിക്ക് വിചിത്രവീര്യൻ, ചിത്രാംഗദൻ എന്നീ പുത്രന്മാരുണ്ടായി. അവർ പ്രായപൂർത്തിയാകും മുൻപ് ശന്തനു മരണമടഞ്ഞു. അംബിക, അംബാലിക എന്നിവരെ അവർ വിവാഹം കഴിച്ചുവെങ്കിലും സന്താനങ്ങൾ ജനിക്കും മുൻപ് വിചിത്രവീര്യനും ചിത്രാംഗദനും അവരുടെ പ്രവൃത്തിദോഷംകൊണ്ടു തന്നെ മരണമടഞ്ഞു. രാജാവും രാജപുത്രന്മാരുമില്ലാത്ത രാജ്യം അരിതമാകുമെന്നതിനാൽ തനിക്കു മൂത്ത പുത്രനായ വ്യാസനെ വിളിച്ചുവരുത്തി സഹോദര പത്നിമാരിൽ സത്സന്താനങ്ങൾക്ക് ജൻമം നല്കാൻ സത്യവതി നിർദ്ദേശിച്ചു. സർവ്വസംഗപരിത്യാഗിയായ മുനിയായിരുന്നെങ്കിലും മാതാവിന്റെ ആജ്ഞയെ ശിരസാവഹിച്ചുകൊണ്ട് സഹോദരപത്നിമാരെ സ്വീകരിക്കാൻ അദ്ദേഹം തയ്യാറായി. അംബികയെ സമീപിച്ച വ്യാസനെ കണ്ടിട്ട് വൈരൂപ്യം സഹിക്കാൻ കഴിയാത്തവളെപ്പോലെ കണ്ണുകൾ പൊത്തിക്കളഞ്ഞു. കോപിഷ്ഠനായ വ്യാസൻ നിനക്കുണ്ടാകുന്ന പുത്രൻ അന്ധനാകട്ടെ എന്നു ശപിച്ചു. തുടർന്ന് അംബാലികയെ സമീപിച്ച വ്യാസനെ കണ്ടിട്ട് അവളാകെ വിളറിവെളുത്ത് പാണ്ഡുരോഗിയെപ്പോലെ ഭാവം പകർന്നു. വ്യാസൻ അവളേയും ശപിച്ചു നിനക്കുണ്ടാകുന്ന പുത്രൻ പാണ്ഡുരോഗിയാകട്ടെ എന്ന്.

ഇപ്രകാരം രണ്ടു പുത്രന്മാരുണ്ടായെങ്കിലും വൈരൂപ്യങ്ങളില്ലാത്ത ഒരു പുത്രന് ജന്മം കൊടുക്കണമെന്ന് സത്യവതി അംബികയോടാവശ്യപ്പെട്ടതുപ്രകാരം അവൾ തന്റെ പ്രിയ തോഴിയായ ശൂദ്രസ്ത്രീയെ വ്യാസസമീപത്തേയ്ക്ക് നിയോഗിച്ചു. അവളാകട്ടെ ആസമാഗമം പരമഭാഗ്യമായിക്കരുതി ഭക്തിയും അനുരാഗവും കലർന്ന മനസ്സോടെ വ്യാസനെ സ്വീകരിച്ചു. സന്തുഷ്ടനായ വ്യാസൻ നിക്കുണ്ടാകുന്ന പുത്രൻ സർവ്വവിദ്യാപാരംഗതനാകട്ടെ എന്നനുഗ്രഹിച്ചു. ഇപ്രകാരം കുരുവംശരാജാക്കന്മാരുടെ നേതൃസ്ഥാനത്തു വർത്തിക്കുന്ന ധൃതരാഷ്ട്രരുടേയും പാണ്ഡുവിന്റേയും സഹോദരനായി ജനിച്ച വ്യാസപുത്രനാണ് വിദുരർ. മഹാപണ്ഡിതനും സർവ്വശാസ്ത്രവിശാരദനുമാണെങ്കിലും ശൂദ്രസ്ത്രീയിൽ പിറന്നവനാകയാൽ ചാതുർവർണ്യത്തിന്റെ ഫലമായി അദ്ദേഹത്തിന് രാജ്യാധികാരം ലഭിക്കുന്നില്ല. ധൃതരാഷ്ട്രർ ഏതു കാര്യത്തിനും വിദഗ്ധോപദേശം തേടുന്നത് വിദുരരിൽനിന്നായിരുന്നു. അതുകൊണ്ട് തന്നെ കുരുക്ഷേത്രയുദ്ധമാരംഭിക്കും മുൻപ് രാജനീതിയെക്കുറിച്ച് വിദുരരുമായി ചർച്ചചെയ്യുന്നു. ഈ ഭാഗമാണ് മഹാഭാരതത്തിലെ പ്രസിദ്ധമായ വിദുരവാക്യം എന്നറിയപ്പെടുന്നത്.

'पर्व' शब्दं पुल्लिङ्गे नपुंसकलिङ्गे च उपयुङ्क्ते। अतः

पर्वः पर्वौ पर्वाः। पर्वम् पर्वे पर्वाणि। इति द्वैविध्येन दृश्यन्ते।।

अतः अष्टादश पर्वाः,अष्टादश पर्वाणि इत्युभावपि साधु एव।

# सप्तमः पाठः
# शास्त्रोपासकः अच्युतपिषारटिः

## आमुखम्

वीरपुरुषाणां जन्मना, पावितोऽयं केरलदेशः केरलेषु अनेके पण्डिताः सन्ति। संस्कृत साहित्यशाखानां विविधमेखलासु व्यापृतेषु पण्डितेषु शास्त्रोपासकः कश्चन पण्डितः आसीत् श्री अच्युतपिषारटि महाशयः। तस्य जीवनचरितं योगदानञ्च छात्राणां पठनाय अध्यापकानां पाठनाय च सहायकमिति विज्ञायैव अत्रायोजितः।

**आशयः** - अच्युतपिषारटिः संस्कृतव्याकरणे ज्योतिषे च महापण्डितः।

**उद्देश्यम्** - महात्मनां जीवनचरितानां परिचयः तथा लेखनं च।

**कालांशः** - 13

**आधारग्रन्थाः** - रचितम् - केरलसाहित्यचरित्रम् (उल्लूर्)

**ऐ सी.टी साध्यताः** - महात्मनां चित्राणां सन्द्रमुद्रिकां प्रदर्शयति।

| आशयः/धारणा / व्यवहाररूपाणि। | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः। |
|---|---|---|
| जीवनचरितम्।<br>शास्त्रोपासकस्य संस्कृतपण्डितस्य कस्यचन जीवनपरितम्।<br>पण्डितान् प्रति आदरः। | जीवननचरितं पठित्वा आशयं संक्षिप्य वदाति लिखति। प्रश्नान् रचयति। उत्तराणि लिखति। अव्यय पदानि वाक्येषु योजयति। सूचनानुसारं लघुजीवन चरितंरचयति। जीवनचरितसम्पुटं निर्माति। | जीवनचरितं पठित्वा आशयं वदति लिखति।<br>प्रश्न वाचकपदानि स्ववाक्ये योजयति।<br>संख्यां वदति लिखति च।<br>अव्ययपदानि वाक्येषु योजयति। |

**प्रवर्तनम् 1** - पाठभागस्य वाचनम्।

**उद्देश्यम्** - सस्वरवाचनेन आशयावगमनम्।

**प्रक्रिया** -

अध्यापकस्य निर्देशानुसारं छात्राः वाचयन्तु। कतिपयानां छात्राणां वाचनानन्तरं कमपि मार्गमवलम्ब्य छात्रसङ्घं रूपवत्कृत्य सङ्घवाचनाय पाठभागं ददातु। वाचनानन्तरं पाठभागान्तर्गतानां पदानां चयनं, पदच्छेदं, कठिनपदानां अर्थानां कोशसह्येन लेखनम् इत्यादयः करोतु। वाचनावसरे छात्राः क्लेशमनुभवन्ति चेत् उचितं साह्यमपि करोतु।

**प्रवर्तनम् 2** प्रश्नानाम् उत्तराणां च लेखनम्।

**उद्देश्यम्** प्रश्नवाचकशाब्दानां परिचायनम्।

**प्रक्रिया**

अध्यापकः प्रवृत्तिपुटस्य पूर्तीकरणाय ददातु। छात्राः निर्देशानुसारं पूर्तीकुर्वन्तु।

अधोदत्तानि वाक्यानि पठित्वा रेखाङ्कितपदस्य उचितं प्रश्नवाचकशब्दं निर्धार्य लिखत।

1. शास्त्राध्ययनेन प्रसिद्धः केरलीयपण्डितः आसीत् श्री अच्युतपिषारटिः।
   (कः, किम्, कुत्र)
2. सः मलप्पुरं जिल्लायाः तिरूरस्थे तृक्कण्डियूर् पिषारत् भवने भूजातः।
   (कति, कुत्र, कथम्)
3. सः पञ्चचत्वारिशंदुत्तरपञ्चदशशततमे (1545) वर्षे भूजातः।
   (कथम्, कति, कदा)
4. अच्युतपिषारटिः स्वजीवितं वागुपासनाय समर्पितवान्।
   (कथम्, किमर्थम्, किम्)
5. सः बाल्ये एव व्याकरणादिकं पठित्वा पाण्डित्यमवाप।
   (किम्, कुत्र, कथम्)
6. नारायणभट्टपादः अच्युतपिषारटिमहाशयस्य शिष्यत्वं स्वीचकार।
   (कः, कुतः, कुत्र)

7. क्रिस्त्वब्दे षोडशशतके आसीत् अच्युतपिषारटिमहोदयस्य जीवनकालः।

(कदा, किम् ,कुत्र)

8. अच्युतपिषारटिमहोदयेन अनेके ग्रन्थाः विरचिताः।

(किम्, कति, किमर्थम्)

9. तस्य प्रशस्ता रचना भवति गोलदीपिका।

(कः, का, किम्)

10. पिषारटिः एकविंशत्युत्तरषोडशशततमे वर्षे दिवंगतः।

(कः, कुत्र, कदा)

छात्राः प्रवृत्तिपुटं पूर्तीकुर्वन्ति। अध्यापकः तानि सञ्चित्य परस्परं विनिमाय छात्रेभ्यो दत्वा मूल्यनिर्णयं कारयतु। तदर्थं साधूनां पदानां विलिख्य प्रदर्शनमपि करोतु।

1. कः 2. कुत्र 3. कदा 4. किमर्थम् 5. किम्

6. कः 7. कदा 8. कति 9. का 10. कदा

परस्परमूल्यनिर्णयानन्तरं प्रश्नवाचकशब्दानां प्रयोगसामर्थ्यं कथमिति क्रोडीकरोतु।

**प्रवर्तनम् 3** उदाहरणानुसारं संख्याम् अक्षराण्युपयुज्य लिखतु।

**उद्देश्यम्** संख्यावाचकशब्दानां परिचायनम्।

**प्रक्रिया**

अधिकवाचनांशं पठित्वा उदाहरणानुसारं संख्याम् अक्षराण्युपयुज्य परिवर्तनाय छात्रान् ददातु। परिवर्त्य लेखनाय अधिकतया विशदीकरणमपि ददातु। विशदीकरणानुसारं छात्राः लिखन्तु। अध्यापिका मूल्यनिर्णयं कृत्वा क्रोडीकरोतु। संख्याः साधुतया अक्षराण्युपयुज्य विलिख्य प्रदर्शयतु।

## अधिकविस्तरः

മലയാളഭാഷയിൽ സംഖ്യവായിക്കുന്നത് 1947 എന്നത് ആയിരത്തിൽ തുടങ്ങി ഒറ്റയിൽ അവസാനിക്കുകയാണ്. എന്നാൽ സംസ്കൃതത്തിൽ ഒറ്റ, പത്ത്, നൂറ്, ആയിരം എന്ന ക്രമത്തിലാണ് വായിക്കുന്നതും എഴുതുന്നതും അതായത് 7 അധികമുള്ള 40 ഓടുകൂടിയ 9 നൂറിനു ശേഷം ആയിരത്തോടുകൂടിയത് - 1947 എന്ന രീതിയാണ് അവലംബിക്കുന്നത്. ഇംഗ്ലീഷിൽ ഇതിൽ നിന്ന് ഭിന്നമാണ് അവിടെ സംഖ്യയെ രണ്ടായി വിഭജിച്ച് പറയുന്നു അതായത് നയന്റീൻ ഫോർട്ടി സെവൻ എന്ന്. ഈ വ്യത്യാസം ശരിക്കും മനസ്സിലാക്കിക്കൊടുത്താൽ മാത്രമേ കുട്ടികൾക്ക് സംഖ്യ സംസ്കൃതഭാഷാപദങ്ങളുപയോഗിച്ചെഴുതാൻ കഴിയൂ..

| | |
|---|---|
| पञ्चाशदधिकनवशतोत्तरसहस्रम्। | 1950 |
| पञ्चदशोत्तरद्विसहस्रम्। | 2015 |
| चत्वारिंशदधिकनवशतोत्तरसहस्रम्।। | 1940 |
| सप्तपञ्चाशदधिकाष्टशतोत्तरसहस्रम् | 1857 |
| विंशत्यधिकशतम्। | 120 |
| अशीत्यधिकशतम्। | 180 |
| सप्तचत्वारिंशदधिकनवशतोत्तरसहस्रम् | 1947 |
| षड्पञ्चाशदधिकनवशतोत्तरसहस्रम्। | 1956 |
| अष्टोत्तरशतम्। | 108 |
| नवत्यधिकैकशतोत्तरसहस्रम् | 1190 |

**प्रवर्तनम् 4 - यद्यपि - तथापि उपयुज्य वाक्ययोजनम्।**

**उद्देश्यम् - वाक्ययोजनशेषीसम्पादनम्।**

**प्रक्रिया -**

वैयक्तिकलेखनम्।सङ्घे स्थित्वा लेखनम्। परिष्कृत्य लेखनं च।अन्ततः अध्यापिका क्रोडीकृत्य टिप्पणीपुस्तके लेखनाय ददातु।

1. गीता सङ्गीतं न पठितवती।
   गीता सम्यक् गायति।

गीता यद्यपि सङ्गीतं न पठितवती तथापि सम्यक् गायति।

लेखनानन्तरं कतिपयछात्राः अवतारयन्ति। एकैकस्य अवतारणसमये इतरे छात्राः मूल्यनिर्णयमपि कुर्वन्तु। अन्ततः अध्यापिका क्रोडीकरोतु। पुनर्लेखनाय अवसरमपि ददातु।

## क्रोडीकरणम्।

षष्ट्यधिकनवशतोत्तरसहस्रतमे वर्षे पोन्नानी जनपदे मेल्प्पुत्तूर् गेहे श्रीनारायणभट्टः जनिमलभत। अस्य पिता मातृदत्तः माता पय्यूर् भवनस्था चास्ताम्। सः महाशयः संस्कृतभाषायां पण्डित; आसीत्। नारायणीयम्, प्रक्रियासर्वस्वम्, धातुकाव्यम् चेति ग्रन्थाः अनेन विरचितेषु प्रधानाः सन्ति। स्वाहासुधाकरम्, राजसूयम् (चम्पूग्रन्थौ), शूर्पणखाप्रलापम् (निरनुनासिकाप्रबन्धः) गुरुवायुपुरेशस्तवम्, श्रीपादसप्ततिः,माटराजप्रशस्तिः, इत्यादिभिः अनवद्यैः अनेकैः ग्रन्थै; गैर्वाणीमाराधितवान् अयं पञ्चाशदधिकषट्शतोत्तरसहस्रतमे वर्षे दिवंगतः।

# अष्टमः पाठः
# पठनयात्रा

## आमुखम्

व्यक्तीनां सर्वतोमुखविकासः एव विद्याभ्यासस्य लक्ष्यम्। तस्य साधूकरणाय पठनप्रवर्तनैः साकं कलापराणि कायिकपराणि गवेषणपराणि च प्रवर्तनानि आयोजनीयानि। तस्मादेव विद्यालयेभ्यः प्रतिवर्षं पठनयात्राः प्रचलन्ति। अत्र पठनयात्रामधिकृत्य एकं संभाषणपाठम् अवतारयति।

**पाठस्य नाम** - पठनयात्रा।

**आशयः** - पठनयात्रा विज्ञानदायिका भवति।

**नैपुणी** - संस्कृतेन संभाषणम्।

**कालांशः** - 15

**ICT साध्यताः** - पठनयात्रायाः सान्द्रमुद्रिकाप्रदर्शनम्।

| **आशयः/धारणा / व्यवहाररूपाणि।** | **पठनप्रवर्तनानि/ पठनतन्त्राणि** | **पठनाधिगमाः।** |
|---|---|---|
| सम्भाषणम्। पठनयात्रामधिकृत्य अध्यापकस्य छात्राणां च मिथः प्रवृत्तं संभाषणम्। केरलराजधान्याः दृश्यविस्मयस्य चित्रम्। संभाषणनैपुणीवर्धनम्। | व्यक्ततया भावानुसारं च संभाषणांशान् वाचयति। आचारोपचारपदानि विवेचयति। वाक्येषु योजयति। पदानि योजयित्वा संभषणांशान् पूरयति। संभाषणांशान् नाटकरूपेण अवतारयति। | सम्भाषणांशान् पठित्वा आचारोपचारशब्दान् प्रयुङ्क्ते। सम्भाषणांशान् अवतारयति। यात्राविवरणं लिखति। |

**प्रवर्तनम् -1** पदच्छेदः।

**उद्देश्यम् -** पदार्थज्ञानसम्पादनम्।

पाठभागस्य वाचनं कृत्वा तत्रस्थानां सन्धियुक्तपदानां पदच्छेदं लिखन्तु छात्राः। सङ्घे स्थित्वा छात्राः पदच्छेदं कुर्वन्तु। सङ्घे लिखितान् पदच्छेदान् संघनेतारः अवतारयन्तु। अवतारणसमये इतरसङ्घाः मूल्यनिर्णयं कुर्वन्तु।

**मूल्यनिर्णयसूचिके** - अनुयोज्यता।
कृत्यता।

अनन्तरम् अध्यापिका क्रोडीकृत्य पदच्छेदान् प्रदर्शयतु। समानपदानां प्रयोगानपि सोदाहरणं विशदयतु।

## क्रोडीकरणम्

तत्र + अपि - तत्रापि।

तत्र + एव - तत्रैव।

सन्ति + इति - सन्तीति।

गच्छामः + वयम् - गच्छामो वयम्।

## अधिकविस्तरः -

तत्र + अपि - तत्रापि - 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घः।

सन्ति + इति - सन्तीति - इत्यत्रापि सवर्णदीर्घः एव ।

(अ + अ = आ, अ + आ = आ, आ + आ = आ, एवं इ + इ = ई, उ + उ =ऊ)

यथा - अत्र + अपि - अत्रापि।

अत्र + अन्तरे - अत्रान्तरे।

सति + इति - सतीति।

देवी + इति - देवीति।

गुरु + उपदेशः - गुरूपदेशः

तत्र + एव - तत्रैव इत्यत्र 'वृद्धिरेचि' इति सूत्रेण अ + ए = ऐ - तत्रैव।

(अ + ए - ऐ, आ + ए = ऐ, अ + ओ = औ, अ + औ = औ)

यथा - - लोक + एकः - लोकैकः

एक + एकः - एकैकः

**महा + ओषधिः - महौषधिः।**

**गङ्गा + ओघः - गङ्गौघः।**

**दिव्य + औषधम् - दिव्यौषधम्।**

**प्रवर्तनम् -** 2 विग्रहवाक्यलेखनम्।

**उद्देश्यम् -** पदापग्रथनशेषीसम्पादनम्।

अध्यापिका पदच्छेदस्य विग्रहलेखनस्य च भेदान् विशदीकृत्य पाठपुस्तके दत्तं 'सोत्साहमिति' समस्तपदं प्रदर्शयति। एवं समस्तपदानि पाठभागात् चित्वा विग्रहवाक्यलेखनाय छात्रसङ्घान् प्रेरयतु। छात्राः तादृशपदानि चित्वा अवतारयन्तु। अनन्तरं विग्रहवाक्यलेखनमपि कारयतु। लिखितानि वर्गे अवतारयन्तु, अवतारणवेलायाम् अध्यापिका पदानि फलके विलिख्य क्रोडीकरोतु।

पठनयात्रा - पठनाय यात्रा।

गतवर्षे - गते वर्षे।

मृगशाला - मृगान् संरक्षितुं प्रयुक्ता शाला।

पुरावस्तुकेन्द्रं - पुरावस्तूनां संरक्षणकेन्द्रम्।

श्रीपद्मनाभस्वामिमन्दिरम् - श्रीपद्मनाभस्वामिनः मन्दिरम्।

समुद्रतटः - समुद्रस्य तटः।

राजनगरी - राज्ञः नगरी।

सागरसंगमः - सागराणां संगमः।

**प्रवर्तनम् - 3** आचारोपचारशब्दान् पाठभागात् चित्वा लिखन्तु।

**उद्देश्यम् -** आचारोपचारशब्दानां प्रयोगज्ञानम्।

पाठभागस्य वाचनानन्तरं सङ्घे स्थित्वा आचारोपचारशब्दानां चयनाय अध्यापिका निर्दिशतु। छात्राः कुर्वन्तु।चितानि पदानि वर्गे अवतारयन्तु।अध्यापिका छात्रैः साकं चर्चां कृत्वा क्रोडीकरोति। फलके विलिख्य पुनर्लेखनाय निर्दिशतु। छात्रैः प्रथमतया चितानि पदानि निरीक्ष्य मूल्यनिर्णयं करोतु।

**मूल्यनिर्णयसूचिके -** आशयावगमनम्।
अनुयोज्यता।

## क्रोडीकरणम्

महोदये, नमस्ते, सुप्रभातं, उपविशन्तु, श्रीमति, इत्यादयः आचारोपचारशब्दाः।

**प्रवर्तनम् 4** कोष्ठकात् पदानि चित्वा सम्भाषणपूरणम्।

**उद्देश्यम्** सन्दर्भानुसारं संभाषणशेषीम् आर्जयति।

## प्रक्रिया

अध्यापिका पाठपुस्तके दत्तस्य संभाषणांशस्य उचितपदानां समायोजनेन पूरणाय छात्रसङ्घान् निर्दिशतु। छात्राः सङ्घे स्थित्वा लिखन्तु, अवतारयन्तु। तेषाम् अवतारणवेलायाम् अध्यापिका मूल्यनिर्णयं करोतु। तदनन्तरम् अध्यापिका क्रोडीकृत्य टिप्पणिपुस्तके लेखनाय ददातु।

**मूल्यनिर्णयसूचिका -** उचितपदचयनम्।

## क्रोडीकरणम्

छात्राः - नमस्ते।
आपणिकः - नमस्ते। आगच्छन्तु, किम् आवश्यकम्?
सुनिता - कङ्कणम् आवश्यकम्। मूल्यं किम्?
आपणिकः - विंशतिः रूप्यकाणि।
निला - अस्तु! स्वामिविवेकानन्दस्य चित्रं विद्यते वा?

आपणिकः - आम्, तत् चित्रं विद्यते।

निला - कति रूप्यकाणि?

आपणिकः दश रूप्यकाणि।

मुहम्मदः - मह्यमपि द्वे चित्रे ददातु।

आपणिकः आहत्य कति चित्राणि?

निला - त्रीणि चित्राणि।

आपणिकः आहत्य पञ्चाशत् रूप्यकाणि ददातु।

छात्राः - स्वीकरोतु रूप्यकाणि।

आपाणिकः धन्यवादः।

## प्रवर्तनम् - 5 साभिनयावतारणम्।

**उद्देश्यम् - सन्दर्भानुसारेण सम्भाषणशेषीणाम् अभिनयपाटवस्य च सम्पादनम्।**

छात्रान् पञ्चाङ्गसङ्घान् कृत्वा कानि कानि कथापात्राणि कैः कैः स्वीकर्तव्याः इति निश्चिनोति। अनन्तरं परिशीलनं कृत्वा साभिनयावतारणं कुर्वन्तु। अध्यापिका यथोचितं साहाय्यमपि करोतु।

## प्रवर्तनम् - 6 लघूपन्यासरचना।

**(यूष्माभिः कृतायाः यात्रायाः दृश्यानुभवमधिकृत्य)**

**उद्देश्यम् - यात्राविवरणशेषीपरिपोषणम्।**

छात्रैः कृतायाः यात्रायाः दृश्यानुभवान् व्यक्तिपरतया लेखनाय प्रेरयतु छात्रान्। तैर्लिखितानि वर्गे अवतारयन्तु। अध्यापकः स्वाकीयरचनां प्रदर्श्य टिप्पणीपुस्तके लेखनाय छात्रान् प्रेरयतु।

### यात्रानुभवः

2015 नवम्बर् मासस्य पञ्चमदिने विद्यालयात् पठनयात्रार्थं वयं पञ्चचत्वारिंशत् छात्राः पञ्च अध्यापकाः च प्रस्थिताः। प्रभाते षड्वादने प्रस्थिताः वयं दशवादने तिरुवनन्तपुरस्थं नियमसभामन्दिरं प्राप्ताः। प्रवेशनद्वारे आरक्षिपुरुषाणाम् अनुज्ञाम् उपलभ्य अन्तः प्रविष्टाः

वयं प्रथमतः महात्मागान्धिनः, श्री बी.आर.अम्बेद्कर्महाशयस्य च प्रतिमे अपश्याम। ततः प्रस्थिताः वयं पालयं प्राप्य तत्रस्थं क्रैस्तवाराधनालयम् इस्लामिकाराधनालयञ्च दृष्टवन्तः। उभावपि अतिमनोहरसौधैः आकाशगमनाय मत्सरमाणाविव तिष्ठतः। ततः निवृत्ताः वयं लोकप्रशस्तं अत्युन्नतं शिल्पसम्पन्नञ्च श्रीपद्मनाभमन्दिरम् अपश्याम। मन्दिरं प्रविश्य आराधनायाः अनन्तरं कन्याकुमारीं प्रस्थितवन्तः। मध्याह्नभोजनानन्तरं प्रस्थितः यात्रासङ्घः सायाह्ने सार्धपञ्चवादने कन्याकुमारीं प्राप्ताः। तत्र नानादेशादागताः विनोदसञ्चारिणः त्रायाणां समुद्राणां सङ्गमभूमौ सूर्यास्तमयदर्शनार्थम् आकाङ्क्षापूर्वं तिष्ठन्ति स्म। वयमपि तैः साकं तत्र अस्तमनपर्यन्तं स्थित्वा समीपस्थे यात्रीनिवासस्थाने उषित्वा प्रभाते सार्धपञ्चवादने सूर्योदयदर्शनार्थं गताः। षड्वादने सूर्योदयं दृष्ट्वा नावा विवेकानन्दशिलां सन्दर्शनं कृतवन्तः। तत्र दृष्टाः दृश्याः अविस्मरणीयाः। यात्रेयम् अत्यानन्दकरी विज्ञानप्रदा च। प्रत्यागताः वयं सायाह्ने षड्वादने विद्यालयं प्राप्ताः।

**प्रवर्तनम् 6 -** पट्टिकाकरणम्।

**उद्देश्यम् -** अव्ययानि विविच्य जानाति।

अध्यापकः छात्रान् पृच्छति - अव्ययं नाम किम्? इति।

छात्राः वदन्ति

सदृशं त्रिषु लिङ्गेषु
सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु
यन्न व्येति तदव्ययम्।। इति।

अनन्तरं पाठ्यपुस्तके दत्ताः सूचनाः विशदीकरोति। अधिकतया केवलाव्ययानि च सन्तीति प्रस्ताव्य पूर्वपठितपाठभागेष्वन्तर्गतानि अव्ययपदानि सञ्चित्य पट्टिकापूरणं कुर्वन्तु छात्राः। अध्यापिका क्रोडीकरोतु।

## क्रोडीकरणम्।

**क्त्वान्तम्**

चित्वा, पठित्वा, गृहीत्वा

**ल्यबन्तम्**

आगत्य, अवगम्य, परिवर्त्य, निरुह्य, आहूय, प्राप्य, उपगम्य, अनूद्य, निरीक्ष्य, समागत्य, निर्वाप्य, विज्ञाय

**तुमुन्नन्तम्**

शोचितुम्, रोदितुम्, प्रेषयितुम्, ज्ञातुम्, द्रष्टुम्, आहर्तुम्

**केवलाव्ययानि**

एव, च, इति, यद्यपि - तथापि, स्म, तदा, विना, अपि, तथा, सह, तु अद्य, इत्यादीनि।

# एककम् -4

# साधुभाषितम्

**कथाः सुभाषितानि च उपदेशपराणि भवन्ति। उपदेशाः प्रत्यक्षतया परोक्षतया च लभ्यन्ते। गीतासूक्तानि प्रत्यक्षोपदेशपराणि इतरे तु परोक्षोपदेशपरे च।**

**उपदेशान् परिचिनुमः स्वायत्तीकुर्मः!**

## नवमः पाठः

## गीतामृतम्

### आमुखम्

व्यासविरचितं गणेशलिखितं च भवति महाभारतम्।

"धर्मार्थकाममोक्षाणामुपदेशसमन्वितम्।
पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते"।

इति लक्षणमनुसृत्य महाभारतम् इतिहासमेव। अज्ञानरूपान्धकारे निमज्जितान् जनान् बोधसात्कर्तुं त्रयः उपदेशाः तत्रान्तर्गताः तत्रान्तर्भाविताः। ते विदुरनीतिः, भगवद्गीता, भीष्मोपदेशः च। तेषु अन्तर्भूता भगवता श्रीकृष्णेन अर्जुनाय दत्ताः उपदेशाः भवन्ति भगवद्गीता। तत्रान्तर्गतानि कानिचन पद्यानि अत्रायोजितानि।

| | | |
|---|---|---|
| **पाठस्य नाम** | : | गीतामृतम् |
| **आशयः** | : | दैवीगुणानाम् आसुरीगुणानां च परिचयं प्राप्नोति। उत्तमगुणाः के इति जानन्ति। |
| **उद्देश्यम्** | : | भगवद्गीतायाः परिचयः |
| **पठननैपुणी** | : | आलपनसामर्थ्यम्, विवेचनसामर्थ्यम् भाषणसामर्थ्यम् च। |
| **कालांशः** | : | 12 |
| **आधारग्रन्थसूची** | : | महाभारतम् (भगवद्गीता) |
| **ऐ.सी.टी. साध्यता** | : | सान्द्रमुद्रिकायाः उपयोगः। |

| **आशयः/धारणा / व्यवहाररूपाणि।** | **पठनप्रवर्तनानि/ पठनतन्त्राणि** | **पठनाधिगमाः।** |
|---|---|---|
| गीतम्, गीतानाम् आलपननैपुणी। अर्थावगमनम्। गुणानाम् अवगमनम्। भाषणं कर्तुं तात्पर्यः। | गीतस्य आलपनं करोति। आशयं लिखति। गुणानां चयनम्। चर्चाद्वारा प्रभाषणलेखनम्। | गीताश्लोकं सतालम् आलपति। सारांशं वदति लिखति च। गुणान् दोषान् च अधिकृत्य चर्चति। प्रभाषणं करोति। |

## आख्यानम्

अध्यापकः कक्ष्यां प्रविश्य छात्रान् एवं वदतु। 'अयि भो छात्राः! केषाञ्चन महात्मनां नामानि वदन्तु? महात्मागान्धी, स्वामि विवेकानन्दः, श्रीनारायणगुरुदेवः, भगत्सिंहः, चट्टम्पिस्वामी, श्रीरामकृष्णपरमहंसः, नेल्सण् मण्डेला,.....।

ते कथं महात्मानः अभवन्? तेषां महत्वस्य कारणं किम्?

स्नेहशीलः परोपकारः..... इत्यादि वदेयुः।

पुनः?

त्यागशीलः, सत्यसन्धता....।

ततोऽप्यधिकं?

दया, दाक्षिण्यम्, करुणा....।

अनन्तरम्?

अहिंसा, क्रोधराहित्यम्.....। एतादृशाः गुणशीलयुक्ताः एव महात्मनः भवन्ति। वेदव्यासविरचिते महाभारते भीष्मपर्वणि अन्तर्भूता भवति भगवद्गीता। तस्यां भगवद्गीतायां गुणयुक्ताः उपदेशाः सन्ति। ते अस्माकं पाठपुस्तके सन्ति। तत् पश्यामः।

**प्रवर्तनम् 1** श्लोकालपनम्।

**उद्देश्यम् -** श्लोकालपने तात्पर्यं जनयति।

**प्रक्रिया -**

अध्यापकः तालानुसारं श्लोकानाम् आलपनाय (वैयक्तिकप्रवर्तनाय) प्रेरयतु। आलपनावसरे अक्षरशुद्धिं पदच्छेदं ताळक्रमादिकं च निरीक्ष्यताम्। एकेन ताळेन गीतं पूर्णतया आलपितुं छात्राः यतन्ताम्। अभ्यासाय प्रेरयतु। अनन्तरं गीतालपनाय अवसरं ददातु। श्लोकान् आलपन्तु यदा छात्राणां सन्देहनिवारणाय छात्रान् एव प्रेरयतु। अन्ते एकेन तालेन समीचीनया रीत्या श्लोकं पूर्णतया आलपितुं छात्राः यतन्ते। अनन्तरं वैयक्तिकदृष्ट्या श्लोकालपनाय अवसरं ददातु। तदानीं छात्राः सतालं श्लोकम् आलपन्ति। ततः सान्द्रमुद्रिकाद्वारा श्लोकानां श्रवणाय अवसरं ददातु।

**प्रवर्तनम् 2 -** संश्लिष्टपदानां चयनं पदच्छेदः च।

**उद्देश्यः -** संश्लिष्टपदपरिचयः पदच्छेदज्ञानं च।

**प्रक्रिया -**

छात्रान् सङ्घान् करोतु। 'गीतामृतम्' इति गीतं पठित्वा संश्लिष्टपदानि चित्वा पदच्छेदं कृत्वा लेखनाय निर्दिशतु। लिखितानि कक्ष्यायाम् अवतारयन्तु। अध्यापकः चार्ट्पत्रे विलिख्य प्रदर्शयतु।

| | | |
|---|---|---|
| दमश्च | - | दमः + च। |
| यज्ञश्च | - | यज्ञः + च। |
| स्वाध्यायस्तप आर्जवम् | - | स्वाध्यायः + तपः + आर्जवम्। |
| सत्यमक्रोधस्त्यागः | - | सत्यम् + अक्रोधः + त्यागः। |

शान्तिरपैशुनम् - शान्तिः + अपैशुनम्।

भूतेष्वलोलुप्त्वम् - भूतेषु + अलोलुप्त्वम्।

ह्रीरचापलम् - ह्रीः + अचापलम्।

शौचमद्रोहो नातिमानिता - शौचम् + अद्रोहः + न + अतिमानिता।

दैवीमभिजातस्य - दैवीम् + अभिजातस्य।

दम्भो दर्पोऽभिमानश्च - दम्भः + दर्पः + अभिमानः + च।

पारुष्यमेव - पारुष्यम् + एव।

चाभिजातस्य - च + अभिजातस्य।

सम्पदमासुरीम् - सम्पदम् + आसुरीम्।

दैवीसम्पद्विमोक्षाय - दैवीसम्पत् + विमोक्षाय।

निबन्धायासुरी - निबन्धाय + आसुरी।

दैवीमभिजातोऽसि - जैवीम् + अभिजातः + असि।

**प्रवर्तनम् 3** आशयलेखनम्

**उद्देश्यम्** : श्लोकानाम् आशयलेखनसामर्थ्यम्।

**प्रक्रिया**

अध्यापकः इच्छानुसारं छात्रान् सङ्घान् करोतु। अनन्तरं पाठभागस्थं पदसूचीमनुसृत्य श्लोकस्थपदानाम् अर्थलेखनाय निर्दिशतु। अर्थावगमनानन्तरं श्लोकस्य आशयं मातृभाषया कथनाय प्रेरयतु। अनन्तरं पाठभागस्य साहाय्येन आशयं लिखतु। अवतारणसमये अध्यापकः यथोचितं साहाय्यं करोतु। पुनः परिष्कृत्य सम्पुटं रचयतु।

**प्रवर्तनम् 4** - सद्गुणानां पट्टिकाकरणम्

**उद्देश्यम्** - गुणानां ज्ञानं विवेचनं च।

**प्रक्रिया**

श्लोकान् पठित्वा दैवीगुणान् आसुरीगुणान् च श्लोकात् चित्वा पट्टिकारुपेण लेखनाय अध्यापकः छात्रान् निर्दिशति। तदर्थम् अध्यापकः छात्रान् सङ्घान् करोतु।

अपेक्षितं साहाय्यम् अध्यापकेन देयम्। छात्राः सङ्घे चर्चां कृत्वा पट्टिकां कुर्वन्ति। पुनः सङ्घे वाचयति। अनन्तरम् अध्यापकस्य निर्देशानुसारम् अवतारयन्ति। सर्वेषां सङ्घानाम् अवतारणानन्तरं परस्परमूल्यनिर्णयाय अध्यापकः निर्दिशति।

**मातृका**

| **दैवीगुणाः।** | **आसुरीगुणाः।** |
|---|---|
| तेजः | दम्भः |
| क्षमा | दर्पः |
| धृतिः | अभिमानः |
| शौचम् | क्रोधः |
| अद्रोहः | पारुष्यम् |
| नातिमानिता | अज्ञानम् |

**प्रवर्तनम् 5** सद्गुणानधिकृत्य प्रभाषणम्

**उद्देश्यम्** प्रभाषणे सामर्थ्यसम्पादनम्।

**प्रक्रिया**

अध्यापकः कक्ष्याम् आगत्य गुणानां महत्वं वदतु। ते अस्माकं जीवने कथम् उपकारकाः भवन्ति इति वदतु। वेदव्यासेन विरचिते महाभारते भीष्मपर्वणि भगवद्गीता अन्तर्भवति इति वदतु। (श्रीकृष्णः अर्जुनोपदेशसमये गुणाः के इति वदति।) गुणानां परिचयं कुर्मः। अध्यापकः छात्रान् सङ्घान् करोतु। सङ्घे चर्चां कृत्वा उत्तमगुणान् अधिकृत्य प्रभाषणलेखनाय निर्दिशतु। अन्ते कक्ष्यामध्ये प्रभाषणरुपेण अवतारयतु।।

**मातृका**

प्रियमित्राणि! आधुनिकजीवने मानवाः अनेकाः समस्याः अभिमुखीकुर्वन्ति। तासां समस्यानां परिहारं न जानन्ति। तादृश्याः समस्याः दूरीकर्तुं भगवद्गीतापठनम् उपकारकं भवति। चिन्मयानन्दस्वामी एवम् अवदत् "सर्वत्र समस्याः। परिहारः एषः ग्रन्थः एव" इति।

वेदव्यासविरचितम् इतिहासकाव्यं भवति महाभारतम्। महाभारते अष्टादश पर्वाणि सन्ति। तत्र भीष्मपर्वणि भगवद्गीता अन्तर्भवति। कौरवपाण्डवानां युद्धं निवारयितुं श्रीकृष्णः दूतः भूत्वा कौरवसभायाम् आगच्छति। श्रीकृष्णः पाण्डवानां अर्हं दायाद्यं पृच्छति। परन्तु दुर्योधनः तन्नाङ्गीकरोति। युद्धस्य आरम्भः अभवत्। युद्धवेलायाम् अर्जुनः रथम् नेतुं सारथिं कृष्णं वदति। बान्धवान् दृष्ट्वा अर्जुनः सम्मोहितः अभवत्। तम् अर्जुनं कर्मनिरतं कर्तुं कृष्णः उपदिशति।

"क्लैब्यं मा स्म गम पार्थ नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप।।" इति।

भगवद्गीता एकं मार्गदर्शकं शास्त्रं भवति। मानवसमस्यानां परिहारमार्गः एषः ग्रन्थः। तस्मात् अवश्यं पठनीयः ग्रन्थः एषः। अस्मिन् ग्रन्थे दैवीगुणान् आसुरीगुणान् च वर्ण्यन्ते। ऐश्वर्यलाभाय निर्भयत्वम्, मनःशुद्धिः, ज्ञानयोगे निष्ठा, दानकर्म, इन्द्रियनिग्रहः, शास्त्रपठनम्, यागः, तपश्चरणं, अहिंसा, सत्यं, क्रोधराहित्यम्, त्यागः, समाधानम्, परदूषणनिवृत्तिः, भूतेषु कारुण्यम्, लोभाभावः, मृदुलता, अचञ्चलता च स्वीकरणीयाः गुणाः भवन्ति।

दैविकम् ऐश्वर्यं लब्धुं तेजः, क्षमा, सहनशक्तिः, धैर्यं, शुचित्वम्, परोपद्रवनिवृत्तिः निरहङ्कारत्वम् च आवश्यकानि भवन्ति। आत्मप्रशंसा अहङ्कारः, अभिमानः, क्रोधः, परुषवचनम्, अज्ञानम्, च आसुरीगुणाः भवन्ति। दैविकसम्पत् संसारबन्धनात् विमोचनाय भवति। आसुरीसम्पत् लौकिकतृष्णावर्धनाय भवति। अतः उत्तमगुणान् आधारीकृत्य जीवनम् अस्मान् अग्रे नयति। एतावदुक्त्वा अहं मम भाषणात् विरमामि।

## दशमः पाठः
## सिंहः सिंह एव।

### आमुखम्

कथाः विविधाः सन्ति। संस्कृतसहित्ये कथाः अद्वतीयस्थानम् अलंकुर्वन्ति। उपदेशात्मिकाभिः गुणपाठत्मिकाभिः विनोद-विज्ञानप्रदाभिः कथाभिः च सम्पन्ना भवति अस्माकं भाषा। कथाश्रेणिभिः बालमनांसि विज्ञानोन्मुखानि कुर्वतः विष्णुशर्ममहाशयस्य पञ्चतन्त्रात् समाकलिता इयं कथा।

**पाठस्य नाम** - सिंहः सिंह एव।

**उद्देश्यम्** - "प्रकृतिजाः स्वभावाः न परिवर्तन्ते" इति अनया कथया अवगच्छन्ति।

**कालांशः** - 10

**आधारग्रन्थ** - पञ्चतन्त्रम्।

| आशयः/धारणा / व्यवहाररूपाणि। | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः। |
|---|---|---|
| कथावाचनं । पदानाम् अर्थज्ञानम्।<br>कथाकथनम् । कथालेखनम्।<br>संभाषणम्। | कथायाः सस्वरवाचनम् ।<br>पदार्थचयनम्।<br>कथावाचनं लेखनं च।<br>संभाषणपूरणम्। | कथां अवतारयति।<br>साभिनयं कथां कथयति।<br>कथां लिखति।<br>संभाषणं लिखति। |

**आख्यानम्।-** विभिन्नमृगाणां चित्रसहितां चार्ट्पत्रिकां अध्यापकः प्रदर्शयति। अनन्तरं चित्रस्थानां मृगाणां नामानि वक्तुं छात्रेभ्यः अवसरं ददाति। छात्राः वदन्ति। (सिंहः, शशकः, जम्बूकः, गजः, हरिणः) सामान्यतः एते पशवः कुत्र दृश्यन्ते इति अध्यापकः पृच्छति। छात्राणां प्रतिकरणानि अध्यापकः फलके लिखति। मृगसम्बन्धिन्यः कथाः पूर्वं श्रुताः वा? पठिताः वा? तादृशीम् एकां कथां परिचिनुमः।

**प्रवर्तनम् 1** पाठभागं वाचनम्।

**उद्देश्यम्** व्यक्ततया स्पष्टतया च वाचनसामर्थ्यसंपादनम्।

**प्रक्रिया**

अध्यापकः छात्रान् संघं कृत्वा वाचनाय निर्दिशतु। संघस्थाः छात्राः वाचयन्तु। संघात् एकः उच्चैः वाचयतु। तस्मिन् अवसरे अध्यापकः स्खालित्यानि निवारयतु। सर्वेषां वाचनाय अवसराः दातव्याः।

**प्रवर्तनम् 2** - समानार्थकपदानि योजयतु।

**उद्देश्यम्** - पदपरिज्ञानम्।

**प्रक्रिया** -

पाठभागस्य वाचनानन्तरं तत्रान्तर्गतानि नूतनपदानि विविच्य लिखन्तु छात्राः। समानार्थकपदानि शब्दकोशस्य साहाय्येन लिखन्तु छात्राः। अध्यापकः शोधयतु। शुद्धानि समानार्थरूपाणि छात्राः टिप्पणिपुस्तके योजयन्तु। मूल्यनिर्णयसूचिकानुसारेण परस्परमूल्यनिर्णयमपि कुर्वन्तु।

| **नूतनपदानि** | **समानार्थकपदानि** |
|---|---|
| निरालम्बः | निराश्रयः |
| जम्बूकः | शृगालः |
| सार्धम् | साकं |
| झटिति | शीघ्रं |
| उपगम्य | समीपं गत्वा |
| अपालयम् | अरक्षम् |

**प्रवर्तनम् 3** - उदाहरणानुसारं पाठभागात् एकपदानि चित्वा लिखतु।

**उद्देश्यम्** - पदच्छेदज्ञानसम्पादनम्।

**प्रक्रिया** -

उदाहरणानुसारं श्लिष्टानां पदानां एकपदलेखनार्थं छात्रान् निर्दिशतु। लिखितानाम् अवतारणाय अवसरं ददातु। तदा अध्यापकः अवश्यसाहाय्यं करोतु।

**विग्रहवाक्यानि -** **समस्तपदानि**

| | |
|---|---|
| कुटुम्बेन सह | सकुटुम्बम्। |
| जम्बूकस्य शिशुम् | जम्बूकशिशुम्। |
| स्वकीयं वासस्थानम् | स्ववासस्थानम्। |
| सिंहस्य पुत्रः | सिंहपुत्रः। |

अत्र एकपदलेखनार्थं दत्तानि विग्रहवाक्यानि भवन्ति। एकपदमित्यनेन समस्तपदमिति अत्र तात्पर्यम्। वृत्यर्थावबोधकं वाक्यं विग्रहम्। वृत्तयः पञ्च कृत्तद्धितसमास एकशेषसनाद्यन्तधातुरुपाः पञ्च वृत्तयः।

**प्रवर्तनम् 4** - सिंह्याः जम्बूकशिशोः च संभाषणम् उचितानि पदानि उपयुज्य पूरयतु।

**उद्देश्यम्** - उचितपदानां योजनम्।

**प्रक्रिया** -

उचितानां पदानां साहाय्येन संभाषणांशस्य पूरणाय संघान् निर्दिशतु। ततः छात्राः तत् लिखित्वा अवतारयन्ति। तत् श्रुत्वा अध्यापकः स्खालित्यानि परिहृत्य फलके लिखतु।

**सिंही** - पुत्र! तिष्ठ, तिष्ठ धावनं किमर्थम्?

जम्बूकशिशुः - (दीर्घ निश्वस्य) तत्र एको गजः।

सिंही - अतः किम्?

जम्बुकशिशुः - ज्येष्ठौ तस्य समीपं गतौ।

सिंही - ततः किम्! तौ पुत्रौ। तयोः गजाद् भयं नास्ति।

जम्बूकशिशुः - तौ शिशू खलु। अतः मम सन्देहः।

सिंही - भयेन अलम्। त्वं गच्छ।

(तस्य, गजः, किं, धावनं, सन्देहः, भयं)

**प्रवर्तनम् 5** कथासारं विज्ञाय इतरान् छात्रान् आस्वादकान् इति मत्वा अभिनयपूर्वकं कथाम् अवतारयितुम् अवसरं ददाति।

**उद्देश्यम्** कथावतारणसामार्थ्यसम्पादनम्।

**प्रक्रिया**

कथामिमां साभिनयम् अवतारणाय निर्दिशतु। छात्राः अवतारयतु। अवतारणसमये इतरे छात्राः मूल्यनिर्णयं कुर्वन्तु।

**मूल्यनिर्णयसूचिकाः।**

कथापात्रस्वभावावगमनम्।

भागभागित्वम्।

क्रोडीकरणम्।

छात्राणां मूल्यनिर्णयानन्तरम् अध्यापकः स्वमतानि विशदीकृत्य क्रोडीकरोति।

**प्रवर्तनम् 6** अनुबन्धं पठित्वा रिक्तस्थानानि पुरयतु।

**उद्देश्यम्** धातुपरिचयसम्पादनम्। 'अपठत्' पठ्धातोः परस्मैपदी लङ्।

| **पुरूषः** | **एकवचम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अपठत् | ______ | ______ |
| मध्यमपुरुषः | ______ | ______ | अपठत |
| उत्तमपुरुषः | अपठम् | ______ | ______ |

पूरणानन्तरं छात्राः अवतारयन्तु। अध्यापकः स्खालित्यानि परिहृत्य क्रोडीकरोतु।

| **पुरूषः** | **एकवचम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अपठत् | अपठताम् | अपठन् |
| मध्यमपुरुषः | अपठः | अपठतम् | अपठत |
| उत्तमपुरुषः | अपठम् | अपठाव | अपठाम |

## अधिकवाचनांशाः

### अव्ययलक्षणम्

सदृशं त्रिषु लिङ्गेषु
सर्वासु च विभक्तिषु
वचनेषु च सर्वेषु
यन्न व्येति तदव्ययम्।।

**ल्यबन्तानि** - निशम्य, उपगम्य, विश्रम्य, निलीय, विहाय, प्रक्षाल्य।

**तुमुन्नन्तानि -** पठितुम्, गन्तुम्, लेखितुम्, वक्तुम्, कर्तुम्, पातुम्।

**क्त्वान्तानि -** पठित्वा, गत्वा, लिखित्वा, श्रुत्वा, कृत्वा, मत्वा।

**अन्यानि -** सह, साकं, परितः, अभितः, अपि, स्म

## कथासाहित्यचरित्रम्

| | | | |
|---|---|---|---|
| **मनोरञ्जककथा** - | बृहत्कथा | - | गुणाढ्यः |
| | वृहत्कथामञ्जरी | - | क्षेमेन्द्रः |
| | कथासरित्सागरः | - | सोमदेवः |
| | जातकमाला | - | अर्यशूरः |
| | वेतालपञ्चविशति | - | विदायसागरभट्टाचार्यः |
| | शुकसप्ततिः | - | अज्ञातकर्तृका |
| | सिंहासनद्वात्रिंशिका | - | अज्ञातकर्तृका। |
| **उपदेशकथाः -** | पञ्चतन्त्रम् | - | विष्णुशर्मा |
| | हितोपदेशः | - | नारायणपण्डितः। |

## एकादशः पाठः
# सुभाषितानि

'इतिहासपुराणेषु तथा रामायणादिषु।
वचनं सारभूतं यत्तत् सुभाषितमुच्यते।।

## आमुखम्

अपारे कविवाङ्मयसागरे रत्नानि इव शोभमानानि पद्यानि भवन्ति सुभाषितानि। तानि मनुष्येषु सत्यधर्मनीतिसदाचारविनयादिसद्गुणान् प्रति आभिमुख्यम्, अधर्म-कौटिल्यादिषु दुर्गुणेषु वैमुख्यं च जनयन्ति। अतः छात्रैः धार्मिकमूल्यसंवर्धनाय सदाचारबोधपरिपोषणाय च सुभाषितानि पठनीयानि। विभिन्नग्रन्थेभ्यः संपादितानि सुभाषितानि अत्र सङ्कलितानि।

**पाठस्य नाम -** सुभाषितानि।

**आशयः** सुभाषितानाम् आशयग्रहणम्।

**कालांशः - 15**

**आधारग्रन्थसूची -** सुभाषितरत्नाकरम्।

| आशयः/धारणा / व्यवहाररूपाणि। | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः। |
|---|---|---|
| सुभाषितालपनम्, अन्वयलेखनम्, आशयलेखनम्, सुभाषितानां अप्तवाक्यानां च चयनम्। | सुभाषितानि सतालमुच्चैरालपति। सुभाषितानाम् अन्वयं लिखति। पाठभागस्य आशयं स्वावाक्यैः लिखति। सुभाषितानि सञ्चिनोति। | सुभाषितानि सतालम् आलपन्ति। अन्वयलेखनसामर्थ्यं सम्पादयति। सुभाषितानाम् आशयं लिखति। सुभाषितानि सञ्चिनोति। |

**प्रवर्तनम् - 1 -** सुभाषितानां सतालम् आलपनम्।

**उद्देश्यम् -** अक्षरस्फुटतया उचिततालेन च आलपनसामर्थ्यम्।

अध्यापकः प्रथमतः छात्रान् संघान् कृत्वा तेषाम् इच्छानुसारं विविधतालानुसारेण पाठभागस्थानां सुभाषितानाम् आलपनाय निर्दिशतु। पुनः एकैकः अपि आलपतु। उचितं साहय्यमपि ददातु। एवं संघशः एकैकशः सुभाषितम् आलपन्तु। छात्राणां वाचनवेलायां अध्यापकः निरन्तरमूल्यनिर्णयमपि करोतु। छात्राणाम् आलपनानन्तरम् अध्यापकः ताळात्मकतया उचितेन स्वरेण वाचनं करोतु।

**प्रवर्तनम् -2** सुभाषितानाम् अन्वयलेखनम्।

**उद्देश्यम् -** अन्वयलेखनसामर्थ्यसम्पादनम्।

अध्यापकः आशयावगमनाय प्रेरयन् प्रश्नोत्तरक्रीडायाः प्रचालनाय छात्रान् निर्दिशतु। छात्राः यावच्छक्यं प्रश्नान् लिखन्तु, क्रींडां चालयन्तु। अध्यापकः उचितं साहाय्यं करोतु। चार्ट्पत्रे विलिख्य क्रोडीकरोतु।

| | | | |
|---|---|---|---|
| उदा : | 1. | अशक्तानां बलं किम्? | क्षमा। |
| | 2. | क्षमा केषां भूषणम्? | शक्तानाम्। |
| | 3. | क्षमा कीदृशी? | वशीकृतिः। |
| | 4. | सर्वं कया सिद्ध्यति? | सर्वं क्षमया सिध्यति। |

अशक्तानां बलं क्षमा (भवति।) शक्तानां भूषणं क्षमा (भवति) लोके वशीकृतिः क्षमा (भवति।) क्षमया किं न सिध्यति। एवम् आशयं ज्ञात्वा तदनुसारं अन्वयं लिखतु। एवं रीत्या इतरेषां सुभाषितानाम् अन्वललेखनाय निर्दिशतु।

**प्रवर्तनम् 3** पाठभागस्य आशयस्य स्ववाक्यैः लेखनम्।

**उद्देश्यम् -** सुभाषितानाम् आशयावगमनम्।

पाठभागस्य आशयं लिखन्तु छात्राः। अनन्तरं द्वित्राः छात्राः अवतारयन्ति। अध्यापकः तानि परिष्कृत्य टिप्पणीपुस्तके लेखनाय प्रेरयति। अवश्यं साहाय्यमपि ददातु।

**प्रवर्तनम् - 4** सुभाषितानां चयनं विलिख्य प्रदर्शनञ्च।

**उद्देश्यम् -** सुभाषितपरिचायनम्।

क्षमा, संयमम्, विधिबलम्, विद्या इत्यादि विषयानुसारं सुभाषितानि सञ्चित्य आनयन्तु छात्राः। पुनः सञ्चितानि सुभाषितानि/ आप्तवाक्यनि स्फोरकपत्रे विलिख्य प्रदर्शयतु। तानि सर्वाणि समाहृत्य सम्पुटमेकं रचयतु।

# अनुबन्धः

## विधिबलम्

1. दैवं फलति सर्वत्र न विद्या न च पौरुषम्।
दैवे विमुखतां यत्ते न कोऽप्यस्ति सहायकृत्।।

എല്ലായിടത്തും വിധിതന്നെയാണ് ഫലിക്കുന്നത്. വിദ്യയോ പൗരുഷമോ അല്ല.
വിധി വിപരീതമാകുമ്പോൾ ആരും സഹായത്തിനുണ്ടാവില്ല.

(സുഭാഷിതഭണ്ഡാഗാരം)

2. विपत्तौ किं विषादेन सम्पत्तौ हर्षणेन च।
भवितव्यं भवत्येव कर्मणामीदृशी गतिः।।

ആപത്തു കാലത്തു വിഷാദിച്ചതുകൊണ്ടും,
സമ്പത്തുകാലത്ത് സന്തോഷിച്ചതുകൊണ്ടും ഫലം എന്ത്?
വരാനുള്ളത് വരുകതന്നെ ചെയ്യും കർമ്മങ്ങളുടെ ഗതിയങ്ങനെയാണ്.

(സുഭാഷിതാവലി)

3. यथा धेनुसहस्रेषु वत्सो विन्दति मातरम्।
तथा पूर्वकृतं कर्म कर्तारमनुगच्छति।।

കിടാവ് ആയിരക്കണക്കിന് പശുക്കളുടെ ഇടയിൽനിന്നും തന്റെ അമ്മയെ കണ്ടെത്തുന്നു. അതുപോലെ പൂർവാർജിത കർമ്മം അതുചെയ്ത വ്യക്തിയെ പിൻതുടരുന്നു. (പഞ്ചതന്ത്രം)

4. अयाचितः सुखं दत्ते याचितश्च न यच्छति।

सर्वस्वं चापि हरते विधिरुच्छृंखलो नृणाम्।

യാചിക്കാതെ തന്നെ സുഖം നൽകുന്നു. യാചിച്ചാലൊട്ട് തരികയുമില്ല സർവ സ്വവും അപഹരിക്കും. മനുഷ്യരെ സംബന്ധിച്ചിടത്തോളം വിധി ഉച്ശൃംഖല മാണ്.

(ഹിതോപദേശം)

5. अचिन्तितानि दुःखानि यथैवायान्ति देहिनाम् ।

सुखान्यपि तथा मन्ये दैवमत्रातिरिच्यते।।

നിനച്ചിരിക്കാത്ത ദുഃഖങ്ങൾ മനുഷ്യർക്ക് ഏതുതരത്തിൽ വന്നു ചേരുന്നോ അതേ വിധത്തിൽ സുഖങ്ങളും വന്നു ചേരുന്നുവെന്ന് ഞാൻ കരുതുന്നു. ഇവിടെ വിധിയുടെ ഇഷ്ടംപോലെ ഓരോന്നും സംഭവിക്കുന്നു.

(ഹിതോപദേശം)

## क्षमा

1. नरस्याभरणं रूपं रूपस्याभरणं गुणम्।

गुणस्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा।।

സൗന്ദര്യമാണ് മനുഷ്യന്റെ യഥാർത്ഥ ആഭരണം സൗന്ദര്യത്തിന്റെ ആഭരണം ഗുണമാകുന്നു. ജ്ഞാനം ഗുണത്തിന്റെ ആഭരണമാണ് ക്ഷമജ്ഞാനത്തിന്റെ ആഭരണമാണ്. (ചാണക്യനീതി.)

2. क्षमा शत्रौ च मित्रे च यतीनामेव भूषणम्।

अपराधिषु सत्वेषु नृपाणां सैव दूषणम्।।

ശത്രുവിലും മിത്രത്തിലും ക്ഷമയെന്നത് യതികൾക്കുമാത്രം ഭൂഷണമാകുന്നു. തെറ്റുചെയ്യുന്ന കൂട്ടത്തിൽ രാജക്കന്മാരെ സംബന്ധിച്ചിടത്തോളം അതൊരു ദൂഷണമാണ്.

3. क्षमातुल्यं तपो नास्ति न सन्तोषात् परं सुखम्।

न तृष्णायाः परो व्याधिन च धर्मो दयासमः।।

ക്ഷമയ്ക്ക് തുല്യമായ ഒരു തപസ്സില്ല. മനഃ സംതൃപ്തിയിൽ കവിഞ്ഞ ഒരു സുഖമില്ല. തൃഷ്ണയിൽ കവിഞ്ഞൊരു വ്യാധിയില്ല. ദയയ്ക്കു സമമായ ഒരു ധർമ്മവുമില്ല.

4. क्षमा शस्त्रं करे यस्य दुर्जनः किं करिष्यति।
अतृणे पतितो वह्निः स्वयमेवोपशाम्यति।।

ഏതൊരുവന്റെ കയ്യിൽ ക്ഷമയാകുന്ന ആയുധമുണ്ടോ അവന്റെ നേർക്ക് ദുർജ്ജനങ്ങൾക്ക് എന്തു ചെയ്യാൻ കഴിയും. പുല്ലോ അതുപോലെ കത്താൻ പറ്റിയ പദാർത്ഥമോ ഇല്ലാത്തിടത്തു വീഴുന്ന തീയ് സ്വയം അണഞ്ഞുപോകും.

(സുഭാഷിത ഭണ്ഡാഗാരം)

## संयमः

1. मनो धावति सर्वत्र मदोन्मत्तः गजेन्द्रवत्।
ज्ञानाङ्कुशसमाबुद्धिस्तत्र निश्चलते मनः।।

എല്ലായിടത്തും മനസ്സ് മദിച്ച ആനയെപ്പോലെ
പായുന്നു. യാതൊരിടത്ത് ജ്ഞാനമാകുന്ന തോട്ടി
ഉൾക്കൊള്ളുന്ന ബുദ്ധിയുണ്ടോ. അവിടെ മനസ്സ്
നിയന്ത്രിതമായിത്തീരുന്നു. (സൂക്തിമുക്താവലി)

2. अवान्तनिपातीनि स्वारूढ़ानि मनोरथं।
पौरुषेणेन्द्रियाण्याशु संयम्य समतां नय।।

മനസാകുന്ന രഥത്തിൽ കയറി വിഷയങ്ങൾക്ക് നേരെ ഓടുന്ന ഇന്ദ്രിയങ്ങളെ സ്വാധീനത്തിലാക്കാൻകഴിയുന്നതുകൊണ്ട് ഇടയ്ക്ക് പതനത്തിലകപ്പെടാം അതിനാൽ പ്രബല പുരുഷാർത്ഥങ്ങളാൽ അവയെ വശത്താക്കി മനസ്സിനെ സംയമനത്തിലേക്ക് നയിക്കുക.

(യോഗവാസിഷ്ഠം)

## विद्या

1. किं कुलेन विशालेन विद्याहीनस्य देहिनः।
अकुलीनोऽपि विद्यावान् देवैरपि स पूज्यते।।

വിദ്യയില്ലാത്തവന് വലിയ കുടുംബത്തിൽ പിറന്നുവെന്നുവെച്ച് എന്താണൊരുഗുണം? കുലമഹിമയൊന്നുമില്ലെങ്കിലും വിദ്യാസമ്പന്നൻ ദേവന്മാരാൽപോലും പൂജിക്കപ്പെടുന്നു.

(ശാർങ്ഗധര പദ്ധതി)

2. रूपयौवनसम्पन्नाः विशालकुलसभवाः।
विद्याहीना न शोभन्ते निर्गन्धाः किंशुकाः इव।।

സൗന്ദര്യത്താലും യൗവനത്താലും സമൃദ്ധരാണെങ്കിലും ഉയർന്ന കുലത്തിൽ ജനിച്ചവരാണെങ്കിലും വിദ്യയില്ലാത്തവർസുഗന്ധമില്ലാത്ത മുരിക്കിൻ പൂവ്പോലെ ശോഭിക്കുന്നില്ല.

3. विद्या ददाति विनयं विनयात् याति पात्रताम्।
पात्रत्वात् धनमाप्नोति धनाद्धर्मं ततः सुखम्।।

വിദ്യവിനയം നൽകുന്നു. വിനയം വ്യക്തിത്വം നൽകുന്നു.
വ്യക്തിത്വം ധനംസമ്പാദിക്കാൻ സഹായിക്കുന്നു.
ധനംകൊണ്ട് ധർമ്മാനുഷ്ഠാനം സാധ്യമാകും. (സുഭാഷിതരത്നാകരം)

4. सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम्।
अहार्यत्वादनर्घत्वादक्षयात्वाच्च सर्वदा।।

ആർക്കും തട്ടിയെടുക്കാൻ കഴിയാത്തതിനാലും വിലമതിക്കാൻ സാധിക്കാത്തതിനാലും ഒരിക്കലും നശിക്കയില്ല എന്നതിനാലും സർവദ്രവ്യങ്ങളിൽ വച്ചും വിദ്യതന്നെ
എല്ലായ്പ്പോഴും അത്യുത്തമമായിട്ടുള്ള ദ്രവ്യമാകുന്നു. (മത്സ്യപുരാണം)

5. मातेव रक्षति पितेव हिते नियुङ्क्ते
कान्तेव चाभिरमयत्यपनीय खेदम्।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिम्
किं किं न साधयति कल्पलतेव विद्या।।

അമ്മയെപ്പോലെ രക്ഷിക്കുന്നു. പിതാവിനെപ്പോലെ ഹിതത്തിൽ നിയോഗിക്കുന്നു. പത്നിയെപ്പോലെ ദുഃഖമകറ്റി സന്തോഷിപ്പിക്കുന്നു. ഐശ്വര്യമുണ്ടാക്കുന്നു. ദിക്കുകളിൽ കീർത്തി പരത്തുന്നു. കല്പവൃക്ഷംപോലെ വിദ്യ എന്തെന്തു സാധിപ്പിക്കുന്നില്ല. (ഭോജപ്രബന്ധം)

## प्रश्नसञ्चिका

1. भारतदेशो मामकदेशः
सुन्दरदेशोऽयम्।
पुण्यपुरातनसंस्कृतिधारा
प्रवहत्यनवरतम्।

क. पद्यं पठित्वा प्रश्नानामुत्तराणि लिखतु।
'प्रवहत्यनवरतम्' -
(सुन्दरदेशः, संस्कृतिधारा, मामकदेशः)
भारतसंस्कृतेः विशेषः कः?
(सुन्दरः, प्रवहति, पुण्यपुरातना)
'संस्कृतिधारा प्रवहति' कदा?
(प्रतिदिनम्, अनवरतम्, प्रतिवर्षम्)

ख. पद्यस्याशयं लिखतु -

2. कथास्तम्भं क्रमीकरोतु।
   1. पुनरपि आवश्यकतां ज्ञात्वा सा शिष्टान् पुत्रानपि प्रेषितवती।
   2. 'प्रतिगृहम् एकैकं युवानं देशरक्षार्थं - प्रेषयन्तु' इति ग्राममुख्यः अवदत्।
   3. काचित् ग्रामीणा पुत्रचतुष्टयेन सह ससुखं वसति स्म।

3. भोः महाशय! मम पुत्रस्य भक्षणकार्ये निष्ठा नास्त्येव। कदापि मितत्वं न पालयति। बुभुक्षितः सः कदाचित् हस्तप्रक्षालनं विनापि भोजनं करोति।
   1. पाठ भागं पठित्वा अधो रेखाङ्किततानां संश्लिष्टपदानां पदच्छेदं लिखत। कोष्टकात् उचित् मुत्तरं चित्वा लिखत।
   2. 'बुभुक्षा' इदि पदस्य अर्थः ——— इति भवति। (पातुम इच्छा, भोक्तुम् इच्छा, ज्ञातुम् इच्छा।)

3. भाजनं कथं करणीयम्?

(हस्तप्रक्षालनं विना, हस्तप्रक्षालनं कृत्वा, अमितत्वेन)

4. नरो नाहं खगो नाहं

द्विनेत्रीच द्विपादपि।

नेत्रयोः मित्रमेवाहं

नाम किं वद सत्वरम्।।

(कूश्माण्डम्, उपनेत्रम्, मार्जनी, अण्डम्, कूपः)

क. एककूप्यां तैलद्वयम्।

ख. अङ्कणमञ्जूषा निरावरणा।

ग. वृषभश्शेते रज्जुर्धावति।

घ. सहस्रपुत्राणां नूपुरमेकम्

उपरिदत्ताः प्रहेलिकाः पठित्वा मञ्जूषातः उचितानि पदानि स्वीकृत्य प्रहेलिकानाम् उत्तराणि लिखतु।

ङ. द्वे नेत्रे यस्य तत् - द्विनेत्री

द्वौ पादौ यस्य तत् - ——— (द्विपदस्य, द्विपात्, द्विपादि)

5. उदाहरणानुसारं लिखतु।

उदा - दर्शयति - अदर्शयत्।

मिलति - ——————।

———— - अभवत्।

2. कश्चित् चीनसञ्चारी पाटलीपुत्रम् अगच्छत्। चन्द्रगुप्तः तदानीं तत्र राजा आसीत्। सञ्चारी तेन सह मिलितवान्। “महाराज! भवतः विजयकथा विदेशेष्वपि प्रसृता वर्तते। विजयरहस्यं ज्ञातुमिच्छामि”। “न तथा किमपि रहस्यं महामन्त्री चाणक्य एव साम्राज्यस्यास्य शिल्पी”।

**कथाभागं पठित्वा प्रश्नानाम् उत्तराणि लिखतु।**

क. चीनसञ्चारिणः आगमनकाले पाटलीपुत्रस्य राजा कः आसीत्?

ख. "सञ्चारी तेन सह मिलितवान्" - केन सह?

ग. साम्राज्यस्यास्य शिल्पी कः?

6. अनाहूतः प्रविशति
अपृष्टो बहु भाषते।
विश्वसत्यप्रमत्तेषु
मूढचेताः नराधमः।।

1. केन उक्तमिदं पद्यम्?
(अर्जुनेन, कृष्णेन, विदुरेण)

2. विदुरेण कस्मै दत्तमुपदेशं इदम्?
(अर्जुनाय, युधिष्ठिराय, धृतराष्ट्राय)

3. पद्यं पठित्वा आशयं स्वावाक्यैः लिखत।

7. कोष्ठकात् समुचितपदानि चित्वा जीवनचरितं रचयतु।

———— (1560) तमे वर्षे पोन्नानी जनपदे मेल्पत्तूर् गृहे श्रीनारायणभट्टः ————। अस्य ———— मातृदत्तः ———— पय्यूर् भवनस्था चास्ताम्। सः महाशयः संस्कृत भाषायां ———— आसीत्। नारायणीयम्, प्रक्रियासर्वस्वं, धातुकाव्यं चेति ———— अनेन विरचिताः सन्ति। अनवद्यैः अनेकैः ग्रन्थैः गैर्वाणीम् आराधितवानयं ———— (1640) तमे वर्षे ————।

(पञ्चाशदधिकषड्शतोत्तरसहस्र, षष्ठ्यधिक पञ्चशतोत्तरसहस्रं, माता, पिता, ग्रन्थाः, दिवंगतःजनिमलभत, पण्डितः)

8. सूचनाः स्वीकृत्य यात्राविवरणमेकं लिखतु

सूचनाः विद्यालयतः प्रभाते सप्तवादने प्रस्थिताः, वर्कलशिवगिरिः, तोन्नक्कल् आशान् स्मारकं, चेम्पषन्तिः, नियमसभामन्दिरम्, मृगशाला, श्रीपद्मनाभस्वामिनःमन्दिरम्, कोवले - सूर्यास्तमयः, मत्स्यकन्यका, रात्रौ सार्धसप्तवादने प्रतिनिवृत्ताः।

9. सहनशक्तिः, आत्मप्रशंसा, तेजोगुणाः अहङ्कारः, अतिमानः, धैर्य्म, शुचित्वम्, शेषः, द्रोहनिवृत्तिः, काठिन्यम्, अहङ्कारनिवृत्तिः, ज्ञानराहित्यम्, इत्यादयः दैवी गुणाः आसुरीगुणाः च। एतौ विविच्य लिखत।

दैवीगुणाः आसुरीगुणाः

10. समानार्थकपदानि योजयतु

क. (साकं, निराश्रयः, समीपं गत्वा, अरक्षत शृगालः, शीघ्रम्)

यथा - निरालम्बाः ———— निराश्रयः।

ख. "पुत्र! अलं भयेन" इत्यत्र 'भयेन' इत्यस्य विभक्तिः का?
(प्रथमा, द्वितीया, तृतीया)

ग. अपालयम् - मारयति इत्यनयोः तुमुन्नन्त-
मव्ययरूपं किमिति लिखत।

11. इन्द्रियाणि च संयम्य
बकवत्पण्डितो नरः।
देशकालबलं ज्ञात्वा
सर्वकार्याणि साधयेत्।। सुभाषितं पठित्वा गद्यक्रमं आशयं च लिखत।